श्रीमान्–लक्ष्मीवान् नेमिर्नेमिनाथो जिनः 'रामगिर्याश्रमेषु' रामो–रमणीयो यो गिरिरुज्जयंताख्य पर्वतस्तस्याऽऽश्रमास्तपस्विवासास्तेषु वसतिं चकार-निवास कृतवान् । 'राम श्यामे हलायुधे । पशुभेदे सिते चारौ, राघवे रेणुकासुते । इत्यनेकार्थः' । यद्यपि श्रीनेमेरेकाकित्वाद्रामगिर्याश्रमे इत्येकवचनमेव न्याय्य, तथापि सन्वेगरसाकुलितचेतसा स्त्र्यादिजनवियुक्तस्थानेष्वेव निवसनात नैकत्रावस्थान मभवति, कदाचित् क्वचिदाश्रमे दिवसमतिवाहयन्तीति बहुवचनं, अनेन चानेकाश्रमपावित्र्यं च पर्वतस्य व्यज्यते । कथभूतेषु स्निग्धच्छाया-तरुषुच्छाया आतापाऽभावस्तया उपलक्षितास्तरव., यद्वा छाया-शोभा तदर्थं तरवः,.यद्वा छाया–प्रधानास्तरव पूर्वापरदिग्भागभाज्यपि सूर्ये–सवितरि येषां छाया न निवर्त्तते-ते छायातरवः, यद्वा छाया-पङ्क्तिस्तस्या तरव स्निग्धा सरसपल्लवोल्लासितच्छायास्तरवो येषु तेषु, छायाशब्दः पंक्तिवाचकोप्यस्ति । यदुक्तमनेकार्थे-'छाया पङ्क्तौ प्रतिमाया-मर्कयोषित्यनातपे । उत्कोचे पालने कान्तौ, शोभाया च तमस्यपीति'। किम्भूत श्रीनेमि. [2] 'प्राणित्राणप्रवणहृदय ' प्राणिना प्रकृतत्वाच्छाग–सारंगादीना यत्त्राण–रक्षणं तत्प्रवणं–तदासक्त हृदयं- चित्त यस्य स , इत्यनेन श्रीनेमिः राजीमतीविवाहार्थमुपागतस्तस्यानेककारुण्याश्रयमृगा–दिवाटकमवलोक्य पश्चाद्वालितरथस्य परमकृपाश्रयत्वं बोधित । किंकृत्वा तत्र वसतिं चकारेत्याह–समग्र-समस्त बन्धुवर्ग–स्वजनसमुदायं परिजनैः सह भोगान् उग्रसेनात्मजा-राजीमतीं च हित्वा–परित्यज्य, इत्यनेन भगवतो नीरागता बोधिता। अतएव कथंभूतः [2] 'विषयविमुखः' विषयाच्छब्दादिविषयरागाद्विमुख – प्रतिकूलमनाः । पुनः किंभूतः [2]'मोक्षकामः' मोक्षं-निःश्रेयस कामयते-वाञ्छयतीति मोक्षकामः, इत्थंविध श्रीनेमीरैवताद्रौ उवासेति प्रथमवृत्तार्थ । अत्र स्वभावोक्तिरलकार ॥ १ ॥

सा तत्रोच्चैःशिखरिणि समासीनमेनं मुनीशं,
नासान्यस्तानिमिषनयनं ध्याननिर्द्धूतदोषम् ।
योगासक्तं सजलजलदश्यामलं राजपुत्री,
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

अथ श्रीनेमिनाथं रेवताद्रौ सम्प्राप्तं श्रुत्वा श्रीराजीमतीस्वप्रियमिलन-गाढोत्कंठा घटितरणरणकरणव्याकुलमानसा स्वपित्रादिभिर्वार्यमाणापि प्रियसखी-सहायात् विहायान्यकृत्य तत्रैव गिरौ जगाम । तत्र च सा राजपुत्री-राजीमती एन मुनीशं-योगिस्वामिनं ददर्श-दृष्टवती । किंभूतं मुनीशं ? उच्चैः शिखरिणि-अत्युन्नतपर्वते उज्जयंताख्ये समासीनमुपविष्टं । पुनः किंभूतं ?'नासान्यस्तानिमिषनयनं' नासिकाया न्यस्ते-स्थापिते ध्यानार्थं अनिमेषे-निमेषरहिते नयने-नेत्रे येन स तं । पुनः किंभूतं ? 'ध्याननिर्द्धूतदोषं' ध्यानेन निर्द्धूताः-पराकृता दोषा-रागद्वेषादयो येन स तं । पुनः किंभूतं ? 'योगासक्तं' योगो-मोक्षोपाय श्रद्धानज्ञानचरणात्मकस्तत्रासक्त-आलीनो यः स तं । पुनः किंभूतं ? 'सजलजलदश्यामलं' सजलो-जलभृतो यो मेघस्तद्वत् श्यामलं-नीलवर्णं । पुनः किंभूतं ? 'वप्रक्रीडापरिणतगजप्रेक्षणीयं' वप्रे तटे क्रीडा वप्रक्रीडा तस्यां परिणतस्तिर्यक् दत्तप्रहारो योऽसौ गजस्तद्वत् प्रेक्षणीयो दर्शनीयो य स तथा तं । अत्र नेमिगजयोर्लुप्तोपमालंकारः ॥ २ ॥

उद्वीक्ष्येमं शमसुखरतं मेदुराम्भोदनादै-
नृत्यत्केकिव्रजमथ नगं प्रोन्मिषन्नीपपुष्पम् ।
सा शोकार्त्ता क्षितितलमगात् स्यान्न दुःखं हि नार्य्याः,
कंठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

सा राजीमती शोकार्त्ता भर्तृनुरागाभावाच्छोकपर्याकुला सती क्षितितलं-पृथ्वीतलं अगात्-प्राप्ता । किंकृत्वा ? इमं-प्रत्यक्षोपलक्ष्यमाणं, श्रीनेमिं शमसुखरतं-उपशान्तिसुखोपगतं उद्वीक्ष्य-दृष्ट्वा, अथेति-पुनरर्थे. । अथ पुनर्नगं-पर्वतमुद्वीक्ष्य । किंभूतं नगं ? मेदुराम्भोदनादैर्मेदुराः-पुष्टा ये अम्भोदनादा-मेघध्वनयस्तैः । किंकृतं ? 'नृत्यत्केकिव्रजं' नृत्यन्-क्रीडां कुर्वन् , केकिव्रजो-मयूरकलापो यस्मिन्स तं । पुनः किंभूतं ? 'प्रोन्मिषन्नीपपुष्पं' प्रोन्मिषन्ति-विकसन्ति नीपवृक्षाणां पुष्पाणि-कुसुमानि यस्मिन्स तं । प्रथममेव शोकलक्षणमर्थमर्थान्तरेण दृढयति, हि-निश्चितं नार्य्याः 'कण्ठाश्लेषप्रणयिनि' कण्ठस्य आश्लेषः कण्ठाश्लेषः,

कण्ठाश्लेषे प्रणयोऽस्यास्तीति कण्ठाश्लेषप्रणयी तस्मिन् प्रियतमलक्षणे जने दूरसंस्थे पुनर्दुःख किं न स्यात् ? अपितु विशेषत एव स्यात् । गिरिशिखरादुत्तीर्णत्वाद्राजीमत्या अपि प्रियेण सह दूरसंस्थत्वमिति । अत्रार्थांतरन्यासोलंकारः ॥ ३ ॥

तां दुःखार्त्तां शिशिरसलिलासारसारैः समीरै-
राश्वास्येव स्फुटितकुटजामोदमत्तालिनादैः ।
साध्वीमद्रिः पतिमनुगतां तत्पदन्यासपूतः,
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

अद्रिरुज्जयंताभिधो गिरिस्तां साध्वी-शोभनशीलां दुःखार्त्तां-राजीमतीं समीरैर्वायुभिराश्वास्येवाश्वासं प्रापयित्वेव 'स्फुटितकुटजामोदमत्तालिनादैः' स्फुटितानि—विकसितानि यानि कुटजानि-कुटजपुष्पाणि तेषां य आमोदः-परिमलस्तेन मत्ता ये अलयो-भ्रमरास्तेषां नादैर्ध्वनिभिः स्वागतं व्याजहार—आबभाषे । कथं ? यथा भवति—'प्रीतिप्रमुखवचनं' प्रीत्या प्रमुखं मुख्यं वचनं यत्र तत्तथा, प्रीतिपेशलवचसा सुखागमनवार्त्तामपृच्छदिति भावः । यद्वा विशेषणमिदं—प्रीतेः प्रमुखं आद्यवचनं यत्तत्प्रीतिप्रमुखवचनं चेति । कथंभूतोऽद्रिः प्रीत एतत्प्रयोजनमनुष्ठास्यामीति हृष्टः । कथंभूतां तां ? पतिमनुगतां—भर्त्तारमनुप्राप्तां । कथंभूतैः समीरैः ?'शिशिरसलिलासारसारैः'शिशिरसलिलैः-शीतलजलैः कृतो य आसारो-वेगवान् वर्षस्तेन साराः-प्रधानास्तैः । किंभूतोऽद्रिः ? 'तत्पदन्यासपूतः' तस्य-श्रीनेमेः पदन्यासेन-चरणरचनया पूतः पवित्रः ॥ ४ ॥

सिद्धैः संगं समभिलषतः प्राणनाथस्य नेमेः,
सा तन्वंगी विरहविधुरा तच्छिरोधिष्ठितस्य ।
तं सम्मोहाद्द्रुतमनुनयं शैलराजं ययाचे,
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥५॥

सा तन्वंगी राजीमती विरहविधुरा—भर्त्तृवियोगपीडिता सती प्राणनाथस्य-नेमेरनुनयं-प्रसादन द्रुत—शीघ्र सम्मोहात मनोभव—विकारोत्थ-चित्त-वैकल्यात्, शैलराज—रैवतक ययाचे-प्राथितवती । किंकुर्वतो नेमेः ? सिद्धेर्मोक्षस्य सगं—सयोग समभिलषत -अभिकाङ्क्षतः । किभूतस्य ? 'तच्छिरोधिष्ठितस्य' तस्य उज्जयतस्य शिरसि—शिखराग्रेऽधिष्ठितस्य-निषण्णस्य, ननु पर्वतस्य चेतना विकलत्वात , कथ त प्रति राजीमत्यास्तत्प्रमादनयाचा घटत ? इत्यनौचित्य चार्थान्तरन्यासेन निरस्यति—हि यस्मात्कामार्त्ताश्चेतनाचेतनेषु प्रकृतिकृपणा भवन्ति प्रकृत्या-स्वभावेन कृपणास्तद्धनानिर्बन्धपरा इत्यर्थ., अयमभिप्रायः। असौ कार्यक्षमोऽक्षमो वाऽयमिति अविचार्यैव, यथा चेतनेषु तथाऽचेतनेष्वपि प्रवर्त्तन्ते-स्वीकारपरा भवन्तीत्यर्थ । यथा कृपणो लक्षणया दरिद्र. प्रकृतौ स्वभावविषये कृपणश्चेतनाऽचेतनस्वभावपरिज्ञानविकल इत्यर्थः । कामार्त्ता इति बहुवचनं व्याप्तिसूचकं । अन्योऽपि कामार्त्त मन तथाविध एव भवति, तेन नास्य दोष इति । अर्थान्तरन्यासोपमालंकारः ॥ ५ ॥

सा तं दूना मनसिजशरै-र्यादवेशं बभाषे,
रक्षत्यार्त्तं शरणगमसौ क्षत्रियस्येति धर्म्मः ।
तन्मां स्वामिन्नवभवदधीनासुमभ्यर्थये त्वां,
याञ्चा मोघा वरमधिगुणे नाऽधमे लब्धकामा ॥६॥

सा राजीमती मनसिजशरैर्मन्मथबाणैर्दूना-सतापिता सती, त यादवेश इति-बभाषेऽभाणीत् । इतीति किं ? शरणग—शरणप्राप्तं आर्त-पीडित रक्षति पालयति, असौ क्षत्रियस्य धर्म -क्षत्रवंशोद्भवस्यानुष्ठानं तत्तस्माद्धेतोर्भवतोऽपि क्षत्रियमौलिमौलिरत्नायमानत्वात हे स्वामिन् ' हे प्राणनाथ ' त्वा प्रार्थये-प्रार्थना करोमि । मा-अबला भवदधीनासु भवति त्वयि आधीना आयत्ता असवः -प्राणा यस्या. सा तां, त्वत्स्वीकारे एव ध्रियमाणजीविता इत्यर्थ , अत्र-रक्ष । यदि कश्चिदन्योऽपि स्वजनो मम वल्लभो भवेत्तदा तमेव नियोजयामि, पर दैवात्त्वमेव मम प्राणप्रियोऽभवस्तेन त्वां ययाचे इत्यर्थः । न चैतदयुक्तं यत -अधि-

गुणे–गुणाधिके पुंसि याञ्चा मोघापि अलब्धकामापि-निष्फलापि वर-इष्ट, अधमे नीचे लब्धकामापि–पूर्णाभिलापापि, नवर–अनुक्तोऽपि उक्तिविशेषादपि शब्द एतावदत्राक्षिप्यते, अकार प्रश्लेपोप्यत्र मन्तव्य । मोघापि अमोघापि वर लब्धकामापि अलब्धकामापि वरमिति कोऽर्थ, ? यद्यपि गुणाधिक प्रार्थितो न ददाति, तदा तस्यैव वचनीयता न याचितु, अधमात् पूर्णकामोऽपि याचको निंद्यत एव ।'वर तु घुसृणे किंचिदिष्टे' इत्यनेकार्थ. । अर्थान्तरन्यासोलंकार ॥६॥

तुंगं शृगं परिहर गिरेरेहि यावः पुरीं स्वां,
रत्नश्रेणीरचितभवनद्योतिताशांतरालम् ।
शोभासाम्यं कलयति मनागप्यलका नाथ ! यस्याः,
बाह्योद्यानस्थितहरशिरश्चन्द्रिका-धौतहर्म्या ॥७॥

हे नाथ ! गिरे –शिखरिणस्तुगं उच्चैस्तर शृग-शिखर परिहर-परित्यज तथा एहि-आगच्छ स्वा–निजां यत्तदोर्नित्यसम्बन्धात्ता पुरीं–नगरीं द्वारिका यावः–गच्छाव । किंभूता पुरी ? 'रत्नश्रेणीरचितभवनद्योतिताशान्तराल' रत्न श्रेणीभी रचितानि–विनिर्मितानि यानि भवनानि-गृहाणि तैर्द्योतितानि-प्रकाशितानि आशांतरालानि–दिगन्तरालानि यया सा ता, यस्या नगर्य्या. शोभा–साम्य मनागपि, अनुक्तोप्यपि शब्दोत्राऽऽक्षिप्यते । अलका-धनदनगरी न कलयति न दधाति, शोभातिशयधारित्वात् तस्या । कथभूता अलका ? 'बाह्योद्यान-स्थितहरशिरश्चन्द्रिकाधौतहर्म्या' बाह्ये उद्यानं बाह्योद्यानं, तत्र स्थितो योऽसौ हरस्तस्य शिरो मस्तकं तत्र या चन्द्रिका तया धौतानि–धवलीकृतानि हर्म्याणि गृहाणि यस्या सा ॥ ७ ॥

आलोक्यैनं तरलतडिताऽऽक्रान्तनीलाब्दमालं,
प्रावृट्कालं विततविकसद्यूथिकाजातिजालम् ।
अंतर्जाग्रद्विरहदहनो जीविताऽलंबनेऽलं,
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

हे नाथ! एनं प्रावृट्कालं-वर्षाकालमालोक्य-दृष्ट्वा अहमिवमद्वदन्योऽपि 'अपि शब्दः संभावनायां' यो जनः पराधीनवृत्तिर्दैवपरतन्त्रो भवेत्, स जीविताऽऽलम्बने प्राणधारणे नालं न समर्थः स्यात्? । श्रावणे हि सजलजलदारवभैरवत्वात् विरहिणीनां जीवितं संशयतुलामधिरोहतीतिभावः । किंभूतो जनः? 'अतर्जाग्रद्विरहदहनः' अतर्भित्ते जाग्रत्-परिस्फुरन् विरह एव दहनोऽग्निर्यस्य सः । किंभूतं वर्षाकालं? 'तरलतडिताक्रान्तनीलाब्दमालं' तरला चंचला या तडिद्विद्युत्तया आक्रान्ता-आश्लिष्टा नीलाब्दमाला-कृष्णमेघश्रेणिर्यस्मिन्स तं । पुनः किंभूतं? 'विततविकसद्यूथिकाजातिजालं' वितता-विस्तीर्णा विकसन्त्यो च यूथिका-मागधीपुष्पाणि जातयश्च मालतीपुष्पाणि तासां जालं-समूहो यस्मिन्स तं, यूथिकाजातयश्च, वर्षास्वेव पुष्प्यन्तीति भावः ॥ ८ ॥

अस्मादद्रेः प्रसरति मरुत्प्रेरितः प्रौढनादै-
र्भिन्दानोऽयं विरहिजनताकर्णमूलं पयोदः ।
यं दृष्ट्वैताः पथिकवदनाम्भोजचन्द्रातपाऽऽभाः,
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥९॥

हे नाथ! अस्मादद्रेर्गिरेरयं पयोदो-मेघः मरुत्प्रेरितो-वायुचलितः प्रसरति-प्रवर्तते किं कुर्वाणः? प्रौढनादैः-प्रचण्डस्तनितैर्विरहिजनताकर्णमूलं विरहिजनता-वियोगिलोकसमूहस्तस्याः कर्णमूलं-श्रोत्रसामीप्यं भिन्दानः विदारयन् । अयमिति कः? यं मेघं दृष्ट्वा एता बलाकाः-बकाङ्गनाविशेषाः खे-आकाशे भवन्तं-त्वां सेविष्यन्ते-भजिष्यन्ति । भवतोऽपि नीलवर्णत्वात् तत्तुल्यत्वेति भावः । किंभूतं भवन्तं? नयनसुभगं-लोचनाभिरामं । किंभूता बलाकाः? 'पथिकवदनाम्भोजचन्द्रातपाभाः' पथिकवदनाम्भोजेषु-पान्थमुखाब्जेषु चन्द्रातप इव कौमुदीवत् आभान्तीति यास्ताश्चन्द्रातपरूपे बलाकादर्शनाद्विरहिजनमुखाम्भोजानि म्लायन्तीति भावः ॥ ९ ॥

वीक्ष्याकाशं नवजलभरश्याममुद्दामकामा-
विर्भावेन व्यथितवपुषो योषितो विह्वलायाः ।

काले कोऽस्मिन् वद यदुपते ! जीवितेशादृतेऽन्यः,
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥

हे यदुपते ! श्रीनेम ! त्वं वद-ब्रूहि । विह्वलाया-विरहेण विक्लवाया योषितो मम राजीमत्या ,अस्मिन्काले-वर्षासमये जीवितेशाद्भर्तुः ऋते विना कोऽन्य विप्रयोगे सति प्राणनाथवियोगे सति सद्य पाति-तत्कालपतनशीलं हृदय रुणद्धि-विरहदु खितमरणाध्यवसायान्निवारयति । किंभूत हृदयं ? प्रणयि स्नेहल, अन्यदपि एतत् रज्ज्वादियन्धेन धार्यते इत्युक्तिलेश,। यत एव प्रणयि तत एव सद्य पाति प्रणयाभावात् प्राय कठिनहृदयाः स्त्रियो भवन्ति। किंभूताया योषित. ? नवजलधरश्याम -नूतनमेघकृष्णं-आकाश-नभो वीक्ष्य उद्दामकामाविर्भावेनोत्कटमनोभवोल्लासेन 'व्यथितवपुष 'व्यथित-पीडितं वपु -शरीर यस्या. सा तस्या ॥१०॥

शैलप्रस्थे जलदतमसाऽऽच्छादिताशाम्बरेण,
स्निग्धश्यामाञ्जनचयरुचाऽऽसादिताभिन्नभावाः ।
यामिन्योमूर्विहितवसतेर्वासरा चाजनेऽस्मिन् ,
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११॥

हे नाथ ! अस्मिन् अजने-जनविरहिते शैलप्रस्थे-उज्जयन्ताद्रिशिखरिणि विहितवसते -कृतनिवासस्य भवतस्तव नभसि-श्रावणे मासि अमूर्यामिन्यो-रात्रय. वासराश्च-दिनानि जलदतमसा-मेघान्धकारेण आसादिताभिन्नभावाः-प्राप्तैकत्वभावा संपत्स्यन्ते भविष्यन्ति,रात्रेरह्नोवा विशेषपरिज्ञानं न भविष्यतीत्यर्थ । किंभूतेन जलदतमसा?'आच्छादित'शाम्बरेण' आच्छादिते-आवृते आशाम्बरे-दिगाकाशे येन तत्तेन । पुन किंभूतेन ?'स्निग्धश्यामाञ्जनचयरुचा' स्निग्धो-रूक्ष श्यामो-योऽञ्जनचय कज्जलजाल तद्वद् रुक्कान्तिर्यस्य तत्तेन । अनुक्तोपि च शब्दोत्राऽऽक्षिप्यते, च पुन, राजहंसा -हंसविशेषा भवतः सहाया अनुचरा संपत्स्यन्ते ॥११॥

तन्मत्त्वैवं व्रज निजपुरीं द्वारिकां सत्सहायै-
र्गोविंदाद्यैः सममनुभवासाद्य राज्यं सुखानि ।

जाते तेषां यदुवर ! पुनः संङ्गमे भाविनी ते,
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥१२॥

हे नाथ ! तत्तस्माद्धेतोरेवं मत्वा-मद्वचन मनस्यवधार्य्य निजपुरीं-स्वीयनगरीं द्वारिका व्रज-गच्छ । तत्र सत्सहायै -सन्तो विद्यमाना सहाया अनुचरा येषा ते, तै सत्सहायैर्गोविंदाद्यैर्विष्णुप्रमुखै समं-सार्द्धं राज्यमासाद्य-प्राप्य सुखानि-विषयसौख्यान्यनुभव-आस्वादय । हे यदुवर ! तेषा गोविन्दादीना सङ्गमे सयोगे जाते, ते-तव पुनर्भूय.स्नेहव्यक्तिर्भाविनी । किंकुर्वतस्तव चिरविरहजं-बहुकालवियोगसमुत्थं उष्णं बाष्प मुञ्चत । अन्योऽपि यश्चिरविरहदु खितो भवति । स तत्संगे सति उष्णां बाष्प मुञ्चति । स्वजनस्य चाग्रतो दु ख विवृतद्वारमिव जायते । एतदेव सखित्वं यच्चिरेण सुहृद्दृष्टेन बाष्पाविर्भावो जायते ॥ १२ ॥

वन्याहारा धृतमुनिजनाऽऽचारसाराः सदारा
यां नाथान्तेवयसि सुधियः क्षत्रियाः संश्रयन्ते ।
किं तारुण्ये गिरिवनभुव सेवसे तां तपोभिः,
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥१३॥

हे नाथ ! या गिरिवनभुव-उज्जयन्तकाननवसुधा सुधिय -परिणतबुद्धय क्षत्रिया अन्तेवयसि-वृद्धावस्थाया सश्रयन्ते-भजन्ते । क्षत्रियाःकिंभूता. सत ? 'वन्याहाराः' वने साधवो वन्या-व्रीह्यादयस्तेषामाहारो-भक्षणं येषा ते वन्याहारा । पुन किंभूता संत ? 'धृतमुनिजनाचारसारा ' धृतोङ्गीकृतो यो मुनिजनाना आचारः-क्रियाविशेषस्तेन सारा -प्रधाना. । पुन किंभूताः सतः ? सदाराः-सकलत्रा. ततस्तारुण्ये-यौवने वयसि हे नाथ ! तपोभि क्षीण क्षीणः-क्षामः क्षामः सन् स्रोतसा-निर्झराणा नदीना वा पय उपभुज्य च पीत्वा । 'किमित्याक्षेपे' ता गिरिवनभुव सेवसे, एतद्वयस्येतत्कर्मणोऽनुचितत्वात् । कीदृश पय ? परिलघु निर्मलत्वाल्लाघवोपेत न दुर्जरमित्यर्थः । वन्येत्यत्र साध्वर्थे यत्, भवार्थे तु वन-शब्दस्य नद्यादौ पठितत्वात् ढक् स्यात्, तथा च वानेयेति रूप स्यात् । यद्वा तत्तस्मिन्नर्थे दिगादित्वात् यत् । 'वन्य वनभवे वन्यो, वनवारिस-

मृहयोः " इति विश्वप्रामाण्याच्च ॥ १३ ॥

काऽत्र प्रीतिस्तव नगवने चारुतद्द्वारिकाया-
स्त्यक्त्वोद्यानं युवयदुजनोन्मादि यत्रासुरारिः ।
निर्जित्येन्द्रं ससुरमनयत्पारिजातं द्युलोकाद्,
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥१४॥

हे नाथ ! द्वारिकायाश्चारु-मनोहरं तत् उद्यानं त्यक्त्वा अत्र नगवने-गिरिविपिने तव का प्रीति ? क आनन्द ? येनात्र निवससीति । किंभूतमुद्यानं ? 'युवयदुजनोन्मादि' युवानस्तरुणा ये यदुजनास्तानुन्मादयतीति यत्तत्तथा । कुत्रचित् 'युवयदुमनोन्मादीति' पाठस्तत्र मनशब्दोऽकारान्तोऽप्यस्तीति 'अवचूर्णौ' । तदिति किं ? यत्रोद्याने असुरारिर्गोविन्द ससुरममरसहितमिन्द्रं-शक्रं निर्जित्य द्युलोकात्-स्वर्लोकात्पारिजातं-कल्पवृक्षमनयत्प्रापयत् । असुरारि किंकुर्वन् ? पथि मार्गे दिङ्नागाना-दिग्गजानां स्थूलहस्तावलेपान्-पीवरशुण्डादण्डप्रहारान् पीवरहस्तमस्पर्शानिति 'वृत्त्यन्तरे' परिहरन्-परित्यजन् ॥ १४ ॥

यत्प्रागासीदमलविलसद्भूषणाभाभिरामं,
भात्यारोहन्नवघनजलोद्भिन्नवल्लीचयेन ।
तत्ते नीलोपलतटविभाभिन्नभासाऽधुनाङ्गं,
वर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥१५॥

हे नाथ ! ते-तव यदङ्गं-वपुः प्राक् गृहनिवासे 'अमलविलसद्भूषणाभाभिरामं' अमलानि-निर्मलानि विलसन्ति-शोभमानानि यानि भूषणानि-मौलिकुण्डलकेयूरादीनि तेषां या आभा-कान्तिस्तया अभिरामं-मनोहरमासीत् । तदङ्गं अधुना वनवासप्रस्तावे 'आरोहन्नवघनजलोद्भिन्नवल्लीचयेन' आरोहन्-ऊर्ध्वमाक्रामन् नवघनजलोद्भिन्नो-नूतनमेघपानीयप्ररूढो यो वल्लीचयो-वीरुत्समूहस्तेन भाति-शोभते । निःसङ्गत्वात् परितो वपुर्वेष्टयन्त्योऽपि वीरुल्लता ना-

पनीयन्त इत्यर्थः । किंभूतेन ? 'नीलोपलतटविभामिश्रभासा' नीलोपला-नील-मणायस्तैर्विभूषितं यत्तटं तस्य विभा-कान्तिस्तया मिश्रा-आश्लिष्टा भा यस्य स तेन । कस्येव ? विष्णोरिव-श्रीवासुदेवस्येव । कथंभूतस्य ? गोपवेषस्य-गोपाल-वेषधारिणः । केन ? बर्हेण-मयूरपिच्छेन । किंभूतेन ? स्फुरितरुचिना-उल्ल-सितकान्तिना, यथा गोपवेषस्य-विष्णोः श्यामं वपुर्बर्हेण शोभते, तथा सम्प्रति तवाप्यङ्गं आरोहद् व्रतति-जालेन राजते ॥ १५ ॥

रम्या हर्म्यैः क्व तव नगरी दुर्गशृङ्गः क्व चाद्रिः,
क्वैतत्काम्यं तव मृदुवपुः क्व व्रतं दुःखचर्य्यम् ।
चित्तग्राह्यं हितमितिवचो मन्यसे चेन्ममालं,
किंचित् पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥१६॥

हे नाथ ! हर्म्यैर्धनिनां गृहै रम्या-मनोहरा तव नगरी द्वारिका क्व ? पुनरद्रिरुज्जयन्तः क्व ? क्वेति महत्यंतरे । किंभूतोद्रि ? 'दुर्गशृङ्गः' दुर्गा-ण्यतिविषमाणि शृङ्गाणि-कूटानि यस्य स । तथा तव एतत्काम्य च कन्त्रं मृदु-सुकुमारं वपुः-शरीरं क्व ? । एतद् दुःखचर्य्यं-दुःखेन चर्यतेऽनुपाल्यत इति दुःखचर्यं, दुःखानुष्ठेयं व्रत क्व ? । हे नाथ ! इति पूर्वोक्त चित्तग्राह्यं-मनोभिलषणीय हित आयत्युपकारक मम चेद्वच किंचिन्मनाक् मन्यसे-चेतस्यालोचयसि, तर्हि भूय पुनर्लघुगति शीघ्रगमन सन्, पश्चाद् द्वारिकायामेव व्रज-गच्छ । उत्तरेण-प्रतिवचनेन अल-पर्याप्त तूष्णीं तत्रैवेहीति भावः ॥ १६ ॥

कुर्वन् पान्थांस्त्वरितहृदयान् संगमायाङ्गनाना-
मेनं पश्याधिगतसमयः स्वं वयस्यं मयूरम् ।
जीमूतोऽयं मदयति विभो ! कोऽथ वाऽन्योऽपि काले,
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥१७॥

हे विभो ! त्व पश्य, अयं जीमूतो-मेघ एनं-प्रत्यक्षोपलक्ष्यमाणं स्वं-निज वयस्यं, मित्र-मयूर मदयति-प्रमोदयति । किंभूतस्त्व ? 'अधिगतसमयः'

अविगत.-परिज्ञातः समय'-प्रस्तावो येन स, प्रस्तावविज्ञ इत्यर्थ । तथा जीमूत. किकुर्वन् ? पान्थान-पथिकान अङ्गनाना-रमणीना संगमाय-सयोगाय त्वरितहृदयान-उत्सुकमनस' कुर्वन्-विदधत् । अथवा युक्तमेतत्, कः अन्योपि नीचोपि काले-अवसरे मित्रे-प्राप्ते सति विमुख -पराङ्मुखो भवति-जायते । किपुनर्यस्तथा तेन प्रकारेण उच्चैर्महात्मा भवति तस्य किंभण्यते ? अतोऽय-मपि महत्वात् स्वमित्रं मयूर मदयतीति भाव· ॥ १७ ॥

पूर्वं येन त्वमसि वयसा भूषितोऽङ्गे समग्रे,
तैस्तैः क्रीडारससुखसखैर्भव्यभोगैरिदानीम् ।
तत्तारुण्यं सफलय पुरीं द्वारिकामेत्य-शीघ्रं,
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥१८

हे नाथ ! येन वयमा त्वं पूर्वं समग्रे अगे भूषितो-मंडित असि । तत्ता-रुण्य-यौवनं वयः इदानीं तैस्तैरेतद्वयसोपभोग्यैर्भव्यभोगै'-प्रधानविषयवि-लासै सफलय कृतार्थय । किंभूतैः ? 'क्रीडारससुखसखैः' क्रीडारसस्य-केलि-रागस्य यत्सुखं तन्सखैस्तत्सहायै । किकृत्वा ? शीघ्रं द्वारिका-पुरीमेत्य-आगत्य । किंभूतस्त्व ? 'सद्भावार्द्रः' स्वभावेन सकरुण , यत कारणात महतां विषये उपकारः न चिरेण फलति ? अपितु तत्कालमेव फलति ॥ १८ ॥

किं शैलेऽस्मिन् भवति वसतो न व्यथा कापि चित्ते,
संत्यज्य स्वां पुरमनुपमां श्रोतते नाथ ! यस्याः ।
रत्नसौधैरसितमणिमयाग्रेण हैमोऽग्रवप्रो,
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१९॥

हे नाथ ! यगद्योर्नित्यमम्बन्धात्ता अनुपमा-अनन्यसदृशा स्वा पुर सत्यज्य अ-स्मिन्शैले रैवतकाख्ये वसतस्तव किं चित्ते कापि व्यथा पीडा न भवति-न जायते ? । यस्या द्वारिकाया 'असितमणिमयाग्रेण' असितमणिमयानि-नीलमणिप्रधानान्यग्राणि यस्य तादृशेन रत्नसौधेन रत्नमन्दिरेण, 'हैम ' हिमस्य-तुषारस्यायं विकारो हैम ,

अग्रवप्रो-अग्रप्राकार.। उत्प्रेक्ष्यते भुव -पृथिव्याः स्तन इव। किंभूत. स्तनः ? मध्ये-श्यामः-अन्तर्नीलवर्ण । पुनःकिंभूतः ? शेषविस्तारपाण्डुः-परित आभोगपाण्डुः। किल स्तनो हि मध्ये श्याम.शेषविस्तारपाण्डुर्भवति, तथाऽत्रापि त्वदीय नीघमतः श्याम परितो हैमवप्रः, शेषविस्तारपाण्डुरिति ॥ १६ ॥

यामालोक्य स्वगृहगमनायोत्सुकाः स्युस्त्वदन्ये,
पश्याऽऽकाशे जलदपटलेऽस्मिन्बलाकावलीन्ताम् ।
अन्तर्विद्युत्स्फुरितरुचिरे सुप्रकाशेन्द्रचापे,
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ २० ॥

हे नाथ ! अस्मिन् जलदपटले-मेघमालाया ता बलाकावली-बकपङ्क्तिं पश्य-वीक्षस्व । तामिति का ? या बलाकावलीं आलोक्य त्वदन्ये-त्वद्भवतोऽन्ये त्वदन्ये स्वगृहगमनाय-निजमदिरप्राप्त्यर्थमुत्सुका स्युर्भवन्ति । एकस्त्वमेव स्वगृहगमनायोत्सुको नास्ति, परमन्ये सर्वेप्युत्सुका भवन्तीत्यर्थः। किंभूते जलदपटले ? 'अन्तर्विद्युत्स्फुरितरुचिरे' अन्तर्मध्ये यद्विद्युत्स्फुरित तेन रुचिरे-प्रधाने । पुनः किंभूते ? 'सुप्रकाशेन्द्रचापे' सुप्रकाशः-शोभनप्रकाश इन्द्रचाप-इन्द्रधनुर्यस्मिन् तत्तस्मिन् बलाकावलीं,कामिव उत्प्रेक्ष्यते ? गजस्याङ्गे भक्तिच्छेदैः -विच्छित्तिविभागैर्नागबंधादिचित्रविशेषैर्विरचिता भूतिमिव-भस्मेव । अत्र जलदपटलस्य गजोपमाबलाकावल्याभूतिसमानतेति भावार्थः ॥ २० ॥

युक्तं लक्ष्म्यामुदितमनसो यादवेशाः सभाया-
मासीनं यं निजपुरि चिरं त्वामसेवन्त पूर्वम् ।
सम्प्रत्येकः श्रयसि स नगं नाथ ! किं वेत्सि नैवं,
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २१ ॥

हे नाथ ! यं त्वा राज्यश्रिया-राज्यलक्ष्म्या युक्तं-सहित निजपुरि-द्वारिकाया सभायामासीन सन्त । पूर्वं यादवेशाः-विष्णुबलभद्रादयः असेवन्त-अभजन्त । किंभूतास्ते ? मुदितमनसः-हृष्टहृदयाः । सम्प्रत्यधुना स त्वं हे नाथ !

एक अनुचरादिवियुक्तो नग-रैवतकशैलं श्रयसि, अतः किं नैव वेत्सि ? यत् हि-यस्मात् कारणात् सर्वोऽपि रिक्तोऽन्तः-साररहितो लघुरल्पतुलनो भवति, पूर्णता गौरवाय कल्प्यते । अत्र प्रस्तुतार्थमाश्रित्य सर्वोऽपि हि रिक्तो-निर्द्रव्यो लघुर्विमानतास्पदं भवति । पूर्णता-विभववत्ता हि गौरवाय मान्यता हेतुरिति ॥२१॥

मुक्तातङ्कास्तव यदुविभो ! जिह्वयाङ्गं लिहन्तः,
संक्रीडन्ते शिशव इव येऽङ्के समाधिस्थितस्य ।
संप्रत्येते पुरमभियतो विप्रयोगेण नेत्रैः,
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २२ ॥

हे यदुविभो ! श्रीनेमे ! तवाङ्क-उत्सगे ये सारगा-मृगा शिशव इव-स्तनधया इव सक्रीडन्ते-रमन्ते । किंभूताः सारगाः ? मुक्तातंकाः-परित्यक्तभया अवधकत्वात्तवेति । पुनः किभूताः ? जिह्वया तवाङ्गं वपुर्लिहन्त -आस्वादयन्त । किंभूतस्य भवत ? 'समाधिस्थितस्य' समाधिश्चित्तस्वास्थ्यं तस्मिन् स्थितः समाधिस्थितस्तस्य, सप्रति-अधुना अन्त.पुर-शुद्धान्त अभियतो-द्वारिकाया अभिमुख गच्छतस्तव-ते सारगा मार्गं सूचयिष्यन्ति-परस्पर कथयिष्यन्ति । अनेन पथा श्रीनेमिरस्माक विश्रम्भास्पदं प्रस्थित., परमस्माभिर्भाग्यहीनैर्न दृष्ट इति । किंभूतास्ते ? विप्रयोगेण-त्वद्विरहेण नेत्रैर्लोचनैर्जललवमुच -अश्रुबिंदुवर्षिण तद्रोदनादेव त्वद्गमनमार्गावगमो भविष्यतीति भावः ॥२२॥

एतत्तुङ्गं त्यज शिखरिणः शृङ्गमङ्गीकुरु स्वं,
राज्यं प्राज्यं प्रणयमखिलं पालयन् बन्धुवर्गम् ।
रम्ये हर्म्ये चिरमनुभव प्राप्यभोगानखंडान्,
सोत्कण्ठानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २३ ॥

हे नाथ ! त्व एतत्तुङ्ग-उच्चैस्तर शिखरिणो-गिरेः शृङ्ग-शिखर त्यज । स्वं-निज प्राज्यं-प्रभूत गजाश्वादिभिर्बहुल राज्यमंगीकुरु-स्वायत्तीकुरु । किंकुर्वन् ? प्रणयं-प्रणयतीति प्रणय "पचादित्वादच्" अखिल-समस्तं बधु-

वर्ग–स्वजनसमुदायं पालयन् । तथा तत्र चिर–चिरकाल रम्ये–साधुनि हर्म्ये–मंदिरे अखण्डान-अन्यूनान् भोगान् प्राप्य सोत्कण्ठानि–उत्कण्ठयुक्तानि प्रियसहचरीसम्भ्रमालिङ्गितानि–अनुभवप्रिया वल्लभाः याः सहचर्य्यस्तासां सम्भ्रमेण-राभस्येन यान्यालिंगितानि तानि उपभुज्व । तत्र सुखेन त्वं तिष्ठेत्यर्थः ॥ २३ ॥

धूतानिद्राऽर्जुनपरिमलोद्गारिणः पान्थसार्थान्,
ये कुर्वीरन् जलदमरुतो वेश्मसंदर्शनोत्कान् ।
तैः संस्पृष्टो विरहिहृदयोन्माथिभिः स्वां पुरीं न,
प्रत्युद्यातः कथमपि भवान् गंतुमाशु व्यवस्येत् ॥२४॥

हे नाथ ! ये जलदमरुतो-मेघवायव पांथसार्थान्-पथिकसमूहान् वेश्मसंदर्शनोत्कान्–गृहालोकनोत्सुकान् कुर्वीरन् । किंभूता जलदमरुतः [2] 'धूतानिद्रार्जुनपरिमलोद्गारिणः' धूता.–कंपिता अनिद्राः-प्रफुल्ला ये अर्जुना-अर्जुनतरवस्तेषां परिमलमुद्गिरतीत्येवशीला धूतानिद्रार्जुनपरिमलोद्गारिणः तैरेव वायुभिः संस्पृष्ट आश्लिष्टो भवान्-त्वं आशु-शीघ्रं कथमपि महता कष्टेन स्वां पुरीं द्वारिकां प्रत्युद्यात –कृताभ्युत्थान. सन्, गन्तुं न व्यवस्येत्–न व्यवसायं विदध्यात् [2] अपितु कुर्यादेव । किंभूतैस्तैः [2] 'विरहिहृदयोन्माथिभि ' विरहिहृदयानि-वियोगि चेतांसि उन्मथ्नंतीत्येवंशीला विरहिहृदयोन्माथिनस्तैः ॥२४॥

नोत्साहस्ते स्वपुरगमने चेद्विमुक्ता त्वयाऽहं,
वृद्धावेतौ तव च पितरौ तज्जनास्ते त्रयोऽमी ।
म्लानास्याब्जाः कलुषतनवो ग्रीष्मतोयाशयाभाः,
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २५ ॥

हे नाथ ! स्वपुरगमने चेद्यदि ते-तव नोत्साहो-नोत्कण्ठा, तदा अहं राजीमती च पुनरेतौ वृद्धौ स्थविरौ पितरौ–शिवासमुद्रविजयाभिधौ तज्जनास्तयोः पित्रोर्जनाः सेवकलोकास्तेऽमी त्रयस्त्वया श्रीनेमिना वियुक्ता-वियोगिन संतो ग्रीष्मतोयाशयाभा –निदाघजलाश्रयाभाः संपत्स्यन्ते–भविष्यन्ति । किंभूतास्ते

त्रय ? 'म्लानाब्जास्या' म्लानानि-संकोचमासादितानि अब्जानीव आस्यानि-मुखानि येषां ते। ग्रीष्मतोयाशयपक्षे तु-म्लानान्यब्जान्येवास्यानि येषां त इति। पुनः कथंभूता ? कलुषतनव –कलुषास्त्वद्वियोगेन स्नानाद्यकरणान्मलिनास्तनव शरीराणि येषां ते। ग्रीष्मे जलाशया अपि जलशोषात् कलुषास्तनवश्चापृथुला एव भवन्तीति। पुन किंभूता ? कतिपयदिनस्थायिहंसाः-कतिपयदिनस्थायिनो हंसा–आत्मानो येषां ते, त्वद्विरहादेव। ग्रीष्मजलाशयपक्षे तु–कतिपयदिनस्थायिनो हंसा–राजहंसा यत्रेति। पुन किंभूताः ? 'दशार्णा' दशेति–दश संख्याका प्राणा ऋणं देयं येषां ते दशार्णाः, त्वद्विरहे दशापि प्राणान् त्यक्ष्यन्तीत्यर्थ। जलाशयपक्षे तु–दशार्णा दशसम्बन्धिनो दशार्णाः। इति व्याख्यालेश ॥ २५ ॥

तन्नः प्राणानव तव मतो जीवरक्षैव धर्म्मो,
वासार्थं वः सुरविरचितां तां पुरीमेहि यस्याः।
वप्रप्रान्ते स्फुरति जलधेर्हारिवेलारमण्याः,
सभ्रभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २६ ॥

हे नाथ! यत्तदोर्नित्यसंबन्धाद्यद्यस्माद्धेतोस्तव जीवरक्षैव–सकलजगज्जन्तुपालनमेव धर्म्मो मतोऽभीष्टस्तत्तस्माद्धेतोर्नः अस्माकं प्राणान्-असून अव-रक्ष। तद्रक्षणमपि द्वारिकामप्राप्तस्य भवतो न भवतीत्यत आह-ता सुरविरचिता-शक्रादेशाद्धनदनिर्म्मिता पुरीं-द्वारवतीं वासार्थं-निवासनिमित्तमेहि-आगच्छ। तामिति का ? यस्या पुर्य्या वप्रप्रान्ते–प्राकारपर्यन्ते जलधेर्लवणसमुद्रस्य पय -पानीयं स्फुरति-शोभते। पयः किमिव ? 'वेला रमण्याः' वेला-अम्भसो वृद्धिः, सैव रमणी-स्त्री तस्या उत्प्रेक्ष्यते-सभ्रभङ्गं-भ्रभङ्गसहितं मुखमिव। किंभूताया वेला रमण्याः ? वेत्रवत्या -वेत्रलता युक्ताया। किंभूतं वारि ? हारि-मनोहरं। पुनः किंभूतं ? चलोर्म्मि-चला ऊर्मयो यत्र तत्तथा ॥२६॥

अस्मादद्रेः प्रतिपथमधः संचरन् दानवारेः,
क्रीडाशैलं विमलमणिभिर्भासुरं द्रक्ष्यसि त्वम्।

अन्तःकान्तारतरसगलद्भूषणैर्यो यदूना-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २७ ॥

हे नाथ ! त्व अस्मात् रैवतकादद्रे मकाशात्प्रतिपथं-प्रतिमार्ग अभ्रः मचरन्-नीचैर्गच्छन् । दानवारेर्विष्णोर्यच्छन्दस्तच्छन्दमपेक्षत इति, त क्रीडा-शैलं-क्रीडापर्व्वत द्रक्ष्यसि-अवलोकयिष्यसि । किम्भूत क्रीडाशैलं ? विमलमणि-भिर्निर्म्मलरत्नैर्भासुर-देदीप्यमानं, यः क्रीडाशैलो यदूना-यादवाना उद्दामानि-उत्कटानि यौवनानि-तारुण्यानि शिलावेश्मभिर्पाषाणगृहै प्रथयति-विस्तारयति । किम्भूतैस्तै ? 'अन्त कान्तारतरसगलद्भूषणैः' अन्तः-शिलागृहाणा मध्ये कान्ताना-स्त्रीणा रतरसेषु-सभोगलीलासु गलंति-पतन्ति भूषणानि येषु तानि तैस्तत्रागताना वहुलः कामिना कामिन्यनुरागो जायत इत्यर्थः ॥ २७ ॥

तस्योद्याने वरतरुचिते त्वं मुहूर्त्त श्रमार्त्त-
स्तिष्ठेस्तुष्टो विविधतदुपानीतपुष्पोपहारैः ।
मुष्णन्नन्तश्चिरपरिमलोद्गारसारं स्मितानां,
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २८ ॥

हेनाथ ! त्व श्रमार्त्तस्तस्य क्रीडाशैलस्योद्याने-वने मुहूर्त-क्षण याव-त्तिष्ठेः-श्रमापनोदं कुर्य्याः । किंभूते उद्याने ? 'वरतरुचिते' वरा -प्रधानाः ये तरवो-माकदशालप्रियालादयस्तैश्चित-व्याप्तं तस्मिन् । किंभूतस्त्व ? 'विविधतदुपानीतपुष्पोपहारैर्विविधा-नानाप्रकारास्तदुपानीतास्ताभिः पुष्पला-वीभिरुपानीता-उपढौकिता ये पुष्पोपहाराः कुसुमोपायनानि तैस्तुष्टो-हृष्टः । पुन किंभूतः ? स्मिताना-हसिताना पुष्पलावीमुखाना-पुष्पाणि लुनन्तीति पुष्पलाव्य', "कर्म्मणोऽण्" अणन्तिर्ङीप्, कुसुमोच्चयकारिण्यस्तासा मुखानि पुष्पलावीमुखानि तेषा छायादानात्-शोभावितरणात् 'क्षणपरिचितः' क्षण-मुहुर्त्त यावत् साभिलाषावलोकनात् अभ्यस्तः । त्व किं कुर्वन् ? अतर्वनस्य मध्ये चिरपरिमलोद्गारसार मुष्णन्-हरन्, तत्सुरभिगन्धाघ्राणं कुर्व्वन्नि-त्यर्थः ॥ २८ ॥

दृष्ट्वा रूपं तव निरुपमं तत्र पीनस्तनीनां,
तासामन्तर्मनसिजरसोल्लासलीलालसानाम् ।
कर्णाम्भोजोपगतमधुकृत् सम्भ्रमोद्यद्विलासै-
र्लीलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोसि ॥२९॥

हेनाथ ! तत्र क्रीडाशैले तासां पीनस्तनीनां-पीवरपयोधराणां लोचनैः चेत्त्वं न रमसे ? तदा वञ्चितोसि-जन्मफलवन्ध्योऽसीति तात्पर्यं । किंभूतानां तासां ? तव निरुपमं-अत्यद्भुतं रूपं दृष्ट्वा 'अन्तर्मनसिजरसोल्लासलीलालसानां' अन्तश्चित्ते मनसिजस्य-कामस्य यो रसस्तस्य या उल्लासलीला तया अलसा-मन्थरा यास्तास्तासां । किंभूतैर्लोचनैः ? 'कर्णाम्भोजोपगतमधुकृत्सम्भ्रमोद्यद्विलासैः' कर्णाम्भोजेषु उपगताः प्राप्ता ये मधुकृतो-भ्रमरास्तेषां सम्भ्रमो भयं तेनोद्यत-उदयं प्राप्नुवन्तो, विलासा येषु तानि तैः । पुनः किम्भूतैः-र्लीलापाङ्गैः चञ्चलनेत्रान्तैः लीलापाङ्गतया च नयनानां विशेषसौन्दर्यमाविष्कृतम् ॥२९॥

तस्मिन्नुद्यन्मनसिजरसाः प्रांशुशाखावनाम-
व्याजादाविःकृतकुचवलीनाभिकाञ्चीकलापाः ।
संधास्यन्ते त्वयि मृगदृशस्ता विचित्रान् विलासान्,
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥३०॥

हेनाथ ! तस्मिन् क्रीडाशैले मृगदृशः सीमन्तिन्यस्त्वयि विचित्रान्-विविधान् विलासान्-नेत्रावलोकनविशेषान् संधास्यन्ते-संयोक्ष्यन्ते । किंभूतास्ताः ? 'उद्यन्मनसिजरसाः' उद्यन्-प्रकटीभवन् मनसिजरसः-कामरागो यासु तास्तथा । पुनः किम्भूताः ? 'प्रांशुशाखावनामव्याजात्' प्रांशवः-उच्चतरा याः शाखास्तासां योऽवनामो-नीचैर्नमनं तस्य यो व्याजो-मिषं तस्मात् । 'आविःकृतकुचवलीनाभिकाञ्चीकलापाः' आविःकृतः-प्रकाशितः कुचानां वलीनां नाभीनां काञ्चीनां च कलापो याभिस्ताः । हि-यस्मात् स्त्रीणां प्रियेषु-वल्लभेषु विभ्रमो-विलासः आद्यं प्रणयवचनं-प्रथमं प्रार्थनावाक्यं, तथा

चानेकार्थः–"प्रणय प्रेमयाच्ञयो" रिति । किल विलासिन्यस्तदनुरक्तातः करण-प्रवृत्या रतिसुरतसम्भोगाभिलाष विभ्रमैरेवाविर्भावयन्ति । न वचसा भर्तुः प्रार्थना विदधतीति भाव ॥ ३० ॥

त्वां याचेऽहं न पथि भवता क्वापि कार्यो विलम्बो,
गन्तव्यातः सपदि नगरी स्वायतः सा त्वदम्बा ।
मुक्ताहारा सजलनयना त्वद्वियोगार्त्तिदीना,
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ ३१ ॥

हे नाथ ! अहं त्वा याचे–अर्थयेयम् । भवता–त्वया–पथिमार्गे क्वापि विलासगार्हे नगादौ न विलम्बो–न कालक्षेप कार्यः, अतः स्वा–स्वकीया नगरी सपदि–शीघ्र गन्तव्या । यतो–यस्माद्धेतोः सा त्वदम्बा-त्वन्माता शिवा राज्ञी येन विधिना-येनोपायेन कार्श्यं-दौर्बल्य त्यजति, त्वया स एव विधिरुपपाद्य -करणीयः। 'एवेन च अवधारणे' त्वदधीनजीवितत्वात्तस्या नान्य प्रीतिकारक इति। अतः स्वगमनेन तस्यास्तुष्टिर्विधेयेति भाव । किंभूता सा ? 'मुक्ताहारा' मुक्तस्त्य-क्तस्त्वद्विरहेण आहारो यया सा मुक्ताहारा। पुन किंभूता ? 'सजलनयना' सजले-साश्रुणी नयने-नेत्रे यस्या सा तथा । पुन. किंभूता ? 'त्वद्वियोगार्त्तिदीना' त्वद्वियोगेन-त्वद्विरहेण या आर्त्तिः-पीडा तया दीना-वैमनस्यं प्राप्ता ॥ ३१ ॥

तस्याधस्ताद्विषमपुलिनां स्वर्णरेखामतीतो,
मार्गे द्रष्टा पुरमनुपमां तां भवान् वामनस्य ।
भुक्त्वा भोगोपचयमवनिं नाकिनामागतानां,
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३२ ॥

हे नाथ ! भवान्–त्व तस्याद्रेरधस्तादुपत्यकाया 'विषमपुलिनां' विषम-निम्नोन्नत पुलिन-तट यस्या सा ता। स्वर्णरेखामतीतोतिक्रान्त. सन , ता-अनु-पमा गरिष्ठा वामनस्य–वामनावतारस्य हरेः पुर–नगर मार्गे द्रष्टा–द्रक्ष्यसि । उत्प्रेक्ष्यते–भोगोपचय–भोगप्रौढिमाण भुक्त्वा अवनिं–पृथ्वीमागताना नाकिना-स्वर्गिणा शेषैः स्वर्गोपभुक्तावशिष्टैः पुण्यैर्हृतमानीत दिव –स्वर्गस्य कान्ति–

मत्कान्तियुक्तं एकमुत्कृष्टं खण्डमिव । तथाविधाद्भुतसमृद्धिमतीं तामवलोक्य लोकैर्भूलोकपुरीयं न भवति, किन्तु स्वर्गविभाग एव, भाग्यैर्भुव प्राप्त इत्युत्प्रेक्षत इति । अत्रोत्प्रेक्षालङ्कारः ॥ ३२ ॥

यस्यां सान्द्रानुपवनलतावेश्मसु स्वेदबिन्दून्,
मुष्णन्नंगात्सुरतजनितानुज्जयन्तीं विगाह्य ।
कुर्वन्तीरे विगलितपटाः सेवते वारनारीः,
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारी ॥ ३३ ॥

हे नाथ ! यस्या नगर्यां शिप्रावातः-शिप्रावन्तीनिकटतटिनी तस्या म्रा(?)–वायुर्वारनारीर्वेश्याः सेवते । किङ्कृत्वा ? उज्जयन्तीं विगाह्य-अवती- र्गाह्य-प्राप्येत्यर्थः । किङ्कुर्वन् ? 'उपवनलतावेश्मसु' वनानामुपसमीपे इति पवन, उपवनं यानि लतावेश्मानि वीरुद्गृहा उपवनलतावेश्मानि तेषु, अगा- च्छरीरात् सान्द्रान्–घनान् सुरतजनितान्–सम्भोगोत्पादितान् स्वेदबिन्दून्- शरीरस्वेदजलकणान् मुष्णन्–हरन् अपनयन्नित्यर्थः । शिप्रावातः किङ्कुर्वन् ? वारनारीर्विगलितपटाः कुर्वन्-अपनीतवसना विदधत् । क इव ? प्रियतम इव । यथा कश्चित् प्रियतम कस्याश्चिन्नायिकाया. सुरतग्लानिं हरति कामुकत्वाच्च तस्या वासास्यपनयति । तथायमपीति । किंभूतः शिप्रावातः ? प्रियतम अङ्गा- नुकूल , पुटपुटिकादानेन प्रियाशरीरावयवसुखप्रदः । किंभूतः प्रियतमः ? प्रार्थ- नाचाटुकारी' प्रार्थनया चाटुकरोति प्रार्थनाचाटुकारी ॥ ३३ ॥

यत्र स्तम्भान्मरकतमयान्देहलीं विद्रुमाणां,
प्रासादाग्रं विविधमणिभिर्निर्मितं वामनस्य ।
भूमिं मुक्ताप्रकररचितस्वस्तिकां चापि दृष्ट्वा,
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥ ३४ ॥

हे नाथ ! यत्र यस्या पुर्यां मरकतमयान्हरिन्मणिप्रधानान्स्तम्भान् चापी- [illegible]

मिर्नानारत्नैर्निर्मितं वामनस्य-विष्णोः प्रासादाग्रं च-भूपमन्दिरशिखरं, तथा मुक्ताप्रकररचितस्वस्तिका-मौक्तिकनिकरविरचितस्वस्तिका भूमि-पृथ्वी चापि दृष्ट्वा सलिलनिधयः-समुद्रास्तोयमात्रावशेषा सलक्ष्यन्ते-निश्चीयन्ते। सर्व्व-मणिमौक्तिकादीनां तद्गृहोपयोगाय प्रवर्त्तितत्वादित्यर्थः ॥ ३४ ॥

अत्रात्युग्रैः किल मुनिवरो वामनः प्राक्तपोभि-
र्लब्ध्वा सिद्धिं सकलभुवनव्यापिना विग्रहेण।
ईशं वासं भुजगसदने प्रापयद्दानवाना-
मित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥३५॥

हे नाथ! यत्र नगर्यां अभिज्ञश्चतुरो जनो-लोकः आगन्तून्-बहिर्देशादागतान् प्राघूर्णकान् बन्धून्-स्वजनान् इत्यमुना प्रकारेण रमयति-विनोदयति। इतीति कथं? किलेति सत्ये, अत्र पुरे वामनो-वामनाकृतिर्मुनिवर अत्युग्र-अत्युत्कटैः प्राक्तपोभिः सिद्धिं लब्ध्वा-प्राप्य निखिलभुवनव्यापिना-समस्तत्रिलोकीप्रसरणशीलेन विग्रहेण-वपुषा दानवानां-दैत्यानां ईशं-स्वामिनं बलिं भुजगसदने-पाताले वासं-निवासं प्रापयत्-अनयत्। इत्येवमागन्तून्जनो रमयतीति ॥ ३५ ॥

तामासाद्य प्रवरनगरीं विश्रुतां सन्निवासं,
कुर्याः पौरैर्नृवर! विहितानेकपूजोपहारः।
आस्तीर्णान्तर्विमलशयनेष्वग्रसौधेषु कामं,
नीत्वा खेदं ललितवनितापादरागाङ्कितेषु ॥ ३६ ॥

हे नृवर! श्रीनेमे! त्वं तां पूर्वोक्तां विश्रुतां-विख्यातां प्रवरनगरीं-प्रधानपुरीमासाद्य-प्राप्य सन्निवासं कुर्य्याः। किंकृत्वा? 'आस्तीर्णान्तरविमलशयनेषु' आस्तीर्णानि-वासोभिः सञ्छन्नानि अन्तर्मध्ये विमलानि शयनानि-शय्या येषु तानि तेषु। अग्रसौधेषु-प्रकृष्टसप्तभूमिधवलगृहेषु कामं-स्वेच्छया खेदं नीत्वा-अपनीय। किंभूतेष्वग्रसौधेषु? 'ललितवनितापादरागाङ्कितेषु' ललितानि-विला-

स्याङ्किता या वनितास्तासां ये पादरागाश्चरणालक्तकास्तैरङ्कितानि यानि तानि तेषु, वात्स्यायनप्रणीतचतुरशीतिकरणाकरणाधिष्ठितनवनिधुवनविलासलालसविला-सिनी जनचरणालक्तककलाञ्छितेषु । किम्भूतस्त्वं ? पौरैर्नागरिकैर्विहितानेकपूजो-पहार विहितः-कृतः पूजोपहार -वस्त्रादिदानोपचारो यस्मै स तथा ॥ ३६ ॥

उद्यानानामुपतटभुवामुज्जयन्त्याः समंता-
दातन्वद्भिर्विपुलविगलन्मालतीजालकानि ।
अङ्गान्मार्गश्रमजलकणान्सेव्यसेऽस्यां हरद्भि-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३७॥

हे नाथ ! त्वं अस्यां पुर्या उज्जयन्त्याम्-अवन्त्यां 'उपतटभुवां' तटस्य शिप्रा तटिनी सबंधिन उपसमीपे इति उपतटं, तत्र भूरुत्पत्तिर्येषां तानि तेषा-मुद्यानानां राजान्त पुरक्रीडार्हाणां वनानां मरुद्भिर्वायुभिः समतादतिशयेन सेव्यसे भज्यसे । किंकुर्वद्भिर्मरुद्भिर्विपुलविगलन्मालतीजालकानि विपुलानि-विस्तीर्णानि विगलन्ति मकरन्द क्षरन्ति, यानि मालतीनां जालकानि-नवकलिका-वृन्दानि तानि, आतन्वद्भिर्विस्तारयद्भिः । पुनः किंकुर्वद्भिः ? अङ्गात्-देहात् मार्गश्रमजलकणान्-वर्त्मखेदोत्पन्नपरिस्वेदबिन्दून् हरद्भिरपनयद्भिः । किंभूतै-स्तोयक्रीडानिरतयुवतिस्नानतिक्तैः तोयक्रीडायां-पानीयकेलौ निरता-आसक्ता या युवतयस्तासां, यानि स्नानानि-स्नानीयचूर्णानि तैस्तिक्ताः-सुरभयस्तैः । तथा चानेकार्थः-" स्नानमाप्लवे स्नानीये च " ॥ ३७ ॥

तत्रोपास्यः प्रथितमहिमा नाथ ! देवस्त्वयाद्यः
प्रासादस्थः क्षणमनुपमं यन्निरीक्ष्य त्वमक्ष्णोः ।
शृण्वन्प्रेक्षा मुरजनिनदान्वारिवाहस्य तुल्या-
नामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३८॥

हे नाथ ! त्वया तत्र पुर्यां प्रासादस्थो-देवगृहावस्थित यस्तदोर्नित्य-योगात् स आद्यो देव -श्रीऋषभजिन उपास्यः-सेव्यः । किंभूतो देव ? 'प्रथि-

तमहिमा' प्रथितो-विख्यातो महिमा—माहात्म्यं यस्येति । स इति क ? य चिनं क्षण यावत्त्वं निरीक्ष्यावलोक्य अक्ष्णोश्चक्षुषो अविकलं—समस्तफलं लप्स्यसे—प्राप्स्यसि । गीतवाद्यानामनन्तपुण्यहेतुत्वात् । किंकुर्वन् ? 'पूजामुरजनिनदान्' पूजार्थं ये मुरजनिनदा-मृदङ्गध्वनयस्तान् शृण्वन—श्रवणविषयी कुर्वन् । किम्भूतास्तान् ? वारिवाहस्य-मेघस्यामन्द्राणामासमंताद् गम्भीराणा-गर्जितानां तुल्यान्-सदृशान ॥ ३८ ॥

त्वद्रूपेणापहृतमनसो विस्मयात्पौरनार्यः,
सौन्दर्याधःकृत-मनसिजे राजमार्गं प्रयाति ।
प्रातस्तस्यां कुवलयदलश्यामलाङ्गे सलीला,
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥३९॥

हे नाथ ! तस्या पुर्य्या प्रातः-प्रभाते त्वयि राजमार्गं प्रयाति-गच्छति सति विस्मयादाश्चर्येण पौरनार्य्य पौरस्त्रिय कटाक्षान् नामोक्ष्यन्ते ? अपितुमोक्ष्यन्ते । किम्भूतान कटाक्षान ? मधुकरश्रेणिदीर्घान—भ्रमरपङ्क्तिवद्गुरुतरान् । किम्भूते ? त्वयि 'सौन्दर्य्याध कृतमनसिजे' सौन्दर्येण-शरीरसौभाग्येन अध-कृतस्तिरस्कृतो मनसिज -कामो येन स तस्मिन् । पुनः किम्भूते ? 'कुवलयदलश्यामलाङ्गे' कुवलयदलवत्—नीलाम्भोजपत्रवत् श्याम-नीलवर्णमंग—वपुर्यस्य स तस्मिन् । किम्भूता पौरनार्य्यः ? त्वद्रूपेण-त्वदीयरूपेण अपहृतमनस -अपहृतं मनो यासा तास्तथा । पुन. किम्भूता ? सलीला -लीलया सहिता. ॥ ३९ ॥

तस्याः पश्यन् वरगृहतर्तिं तां व्रजेर्या स्पृशन्ती-
मैक्यं प्राप्यासितरजनिषु प्रस्फुरद्रत्नदीपाः ।
प्रद्योतन्ते निहततिमिरव्योममार्गश्च लोकैः,
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥४०॥

हे नाथ ! त्व तस्या नगर्यास्ता वरगृहततिं—प्रधानमन्दिरश्रेणिं पश्यन्-अवलोकयन व्रजेर्गच्छेः । किम्भूतस्त्व ? 'भवान्' भातीति भवान् , "भाक्-वीसौ, भातेर्डवतु" रिति ड्रिद्वत् पलयः । किम्भूता ता ? ऐक्यमुच्चैस्तरत्वादेका-

त्मकता प्राप्य द्यामाकाशं स्पृशन्तीमाश्लिष्यन्तीं । 'तच्छन्दो यच्छन्दमपेक्षत' इति वचनात् । यस्या वरगृहतनौ असितरजनिषु-कृष्णपक्षीयरात्रिषु प्रस्फुरद्रत्नदीपाः-प्रस्फुरन्ति-देदीप्यमानानि रत्नान्येवदीपा प्रस्फुरद्रत्नदीपाश्च पुनर्व्योममार्गश्च प्रद्योतते-दीप्यन्ते । कथं ? निहततिमिर-प्रध्वस्तान्धकार यथा स्यात्तथेति । अत्र भवानिति विशेषण व्योममार्गस्य वा सयोज्य, स भवान्-नक्षत्रवान् भवतीति तात्पर्यार्थं । तथा या वरगृहततिर्लोकैः-पौरैर्जनैर्दृष्टभक्तिर्दृष्टाभक्तिर्विच्छित्तिर्यस्या सा । गणकृतमनित्यमिति न्यायात् पुवद्भावः । कथ ? यथा भवति 'शान्तोद्वेगस्तिमितनयन' शान्तोपगतो य उद्वेगस्तेन तिमिते-निश्चले कौतुकालोकनोत्सुकतया नयने यत्र तत्तथा ॥ ४० ॥

पौरैस्तस्या रथमुपहृतं रम्यमास्थाय यान्तं,
द्रष्टुं ग्राम्याः पथि युवतयस्त्वामुपैष्यन्ति तस्मात् ।
शब्दैश्चक्रस्खलदुपलजैरर्थिसार्थे कृतश्री-
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥४१॥

हे नाथ ! तस्याः पुर्य्याः पौरैः रम्य-मनोहर उपहृतमुपानीतं रथमास्थायामारुह्य यातं त्वा द्रष्टुं पथिमार्गे ग्राम्या युवतयः स्त्रिय उपैष्यन्ति-आगमिष्यन्ति । तस्माद्धे स्वामिन ! 'चक्रस्खलदुपलजैः' चक्रेषु-रथाङ्गेषु स्खलन्तः-सश्लेषमामाद्यन्तो ये उपला दृषदस्तेभ्यो जाताश्चक्रस्खलदुपलजास्तैः शब्दै स्तनितमुखरो मा स्म भूः अतिपरुषध्वनिं मा कृथा । तस्मादिति किं ? यस्मात्ता ग्राम्या स्त्रियो विक्लवा -स्वभावविह्वलाः वर्तन्ते । किम्भूतस्त्व ? अर्थिसार्थे-याचकसमूहे, कृतश्रीतोयोत्सर्ग -श्रिय एव तोयानि श्रीतोयानि कृतः श्रीतोयानामुत्सर्गो वितरण येन स. ॥ ४१ ॥

त्वामायान्तं पथि यदुवराः केशवाद्या निशम्य,
प्रीता बन्धूंस्तव पितृमुखान्सौहृदान्नन्दयन्तः ।
साकं सैन्यै रथमभिमुखं प्रेषयिष्यंति तूर्णं,
मंदायंते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥४२॥

हे नाथ! यदुवरा-यादवश्रेष्ठा केशवाद्याः-विष्णुप्रमुखा पथि मार्गे त्वामायान्तमागच्छन्त निशम्य-श्रुत्वा प्रीता-हृष्टा सन्तः, सैन्यैर्वाहिनीभिः साक-सार्द्धं अभिमुखं-सन्मुख तूर्णं-झटिति रथ-स्यन्दन प्रेषयिष्यन्ति-विसर्जयिष्यन्ति। सारथमन्तरेण पद्भ्यामागच्छन्वर्त्मनि श्रान्तः स्यादिति वितर्क्य रथ नेष्यन्तीति। यदुवराः किंकुर्वन्तस्तव पितृमुखान्समुद्रविजयश्रेष्ठान् बन्धून्सौहृदान् मैत्रीतो नन्दयन्त -प्रमोदयन्तो, यथा—भवत्पुत्र श्रीनेमिरागच्छतीत्येव वर्द्धापनिका दानेनेति। यद्रथ त्वा प्रेषयिष्यन्तीत्येव तद्युक्त, खलु यस्मात्कारणात्सुहृदा-मित्राणा सम्बन्धित्वेनाभ्युपेतार्थकृत्याः-पुमासो न मन्दायन्ते। अभ्युपेतमङ्गीकृत, अर्थस्य-प्रयोजनस्य कृत्यं यैस्ते तथा। येन मित्रकार्यं मया कर्त्तव्यमित्यगीकृत भवति, स खलु न मन्दायतेनालस्य भजतीति भाव। पितृमुखानित्यत्र 'मुखशब्द' श्रेष्ठार्थः। यदनेकार्थः—" मुखमुपाये प्रारम्भे, श्रेष्ठे निस्सरणास्ययो " ॥ ४२ ॥

श्रुत्वा तीरे तदनुजलधेरागतं सोपहारो,
मान्यो मंत्री यदि बलपुराच्छीरिणस्त्वामुपैति
तस्यादेया स्वशयविहिता सत्क्रिया तेन चेत्स,
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥४३॥

हे नाथ! तदनु कियन्मार्गातिक्रमे त्वा जलधेः-समुद्रस्य तीरे-तटे आगतं श्रुत्वा, यदि चेद्बलपुरात्सीरिनगरात्सीरिणो-बलभद्रस्य मान्यो-गौरवार्हो मन्त्री-सचिव सोपहार -सोपायन उपैति-आगच्छति। तदा तस्य मन्त्रिणः स्वशयविहिता-स्वपाणिनिर्मिता सत्क्रिया-वस्त्रादिपूजा ते त्वया आदेया-ग्राह्या। युष्मदस्मदोः षष्ठीचतुर्थ्यादिषु विपरीतग्रहणात्कचिदन्यत्राप्यादेशः स्यादिति तृतीयायामपि ते इत्यादेशः। चेद्यदि स मन्त्री न प्रत्यावृत्तः—न प्रतीष्टः कोशेनावर्जित इत्यर्थः। तदा त्वयि नाथे कररुधि तत्-करोपानीतढौकनावरोधकारिणि अनल्पाभ्यसूयः-ईर्ष्यालु स्यादिति भविष्यति। वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वचनात् ॥ ४३ ॥

गच्छेर्वेलातटमनु ततस्तोयमुल्लासिमत्स्यं,
त्वत्संकाशच्छविजलनिधेस्तस्य पश्यन्रथस्थः

यः कामीव क्षणमपि सरित्कामिनीनां न शक्तो,
मोघीकर्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥४४॥

हे नाथ ! ततोनतर वेलातटमनुलङ्घीकृत्य तस्य जलनिधेः-सागरस्य तोय पश्यन त्वं रथस्थः-स्यन्दनारूढो गच्छेर्व्रजे । किंभूत तोय ? उल्लासिमत्स्यं-उल्लासि मत्स्या यस्मिन तत् तथा । पुनः किम्भूत ? 'त्वत्सकाशच्छवि-त्वत्सकाशा तव सन्निभा छवि-कान्तिर्यस्य तत्तथा । तस्येति कस्य ? यः समुद्रः कामीव-कामुक इव सरित्कामिनीना सरित एव-नद्य एव कामिन्यः सरित्कामिन्यस्तासा 'चटुलश फरोद्वर्त्तनप्रेक्षितानि' चटुलाश्चञ्चलाश्च ते शफरा-मत्स्याश्च तेषामुद्वर्त्तनान्येव प्रेक्षि तान्यवलोकनानि तानि चटुलशफरोद्वर्त्तनप्रेक्षितानि, मोघीकर्त्तुं-विफलतां नेतु क्षण मिव-क्षणमपि इव शब्दोप्यर्थः, न शक्तो-नसमर्थ । उद्वर्त्तनेन दृश्यमानम दूरदेशस्यातीवविभ्रमत्वात् । कामिपक्षेतु-कामिनीना चटुलशफरोद्वर्त्तनवां समासः, सोपि तद्विभ्रमान्विफलयितु न शक्नोतीति ॥ ४४ ॥

तां वेलांके विमलसलिलामागतां द्रक्ष्यसि त्वं,
पूर्वोद्दिष्टां सरितमसकृद्वारिभिर्वीचिहस्तैः ।
आलिंग्योपरमति पिबन्यन्मुखं न क्षणार्द्धं,
ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः ? ॥४५॥

हे नाथ ! त्वं वेलाङ्के-वेलोत्सङ्गे-आगतां-प्राप्ता तां-पूर्वोद्दिष्टा-पुरा प्रद- र्शिता स्वर्णरेखानाम्नीं विमलसलिला-निर्मलजला सरित-नदीं असकृद्वारंवारं द्रक्ष्य- स्यवलोकयिष्यसि । तामिति का ? या सरित वीचिहस्तैर्वीचय एव हस्ता येषा ते तैर्वारिभिर्जलैरालिंग्याश्लिष्य यन्मुखं यस्या नद्यामुखमाननं यन्मुख पिबन । अपि शब्दोत्रानुक्तोप्याक्षिप्यते । क्षणार्द्धमपि न उपरमति-न निवर्त्तते । यतो लब्धा स्वादः पुलिनजघना-पुलिनमेव जघनं यस्याः सा तथा तां । अर्थान्तरेतु- पुलिनवत्-पुलिनाकारं जघनमिति तां विहातुं-परित्यक्तुं कः समर्थ ? अपितु न कोपीति । उपरमतीत्यत्र "विभाषाऽकर्मकादिति" सूत्रेण उपाद्रमो वा परस्मै- पदम् ॥ ४५ ॥

तस्मिन्नुच्चैर्दलितलहरीसीकरासारहारी,
वारांराशेस्तटजविकसत्केतकामोदरम्यः
खेदं मार्गक्रमणजनितं ते हरिष्यत्यजस्रं,
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४६॥

हे नाथ ! तस्मिन् वेलातटे उच्चैरतिशयेन वारांराशेः-समुद्रस्य शीतः शीतलो वायुरजस्र-निरन्तर ते-तव 'मार्गक्रमणजनित' मार्गस्य-पथो यत्क्रमणं लघन तेन जनित श्रम हरिष्यति-अपनेष्यति । किंभूतो वायुः ? 'दलितलहरीसीकरासारहारी' दलिता द्वेधीकृता या लहर्य्यः-कल्लोलास्तासा ये सीकरा-वातप्रेरिता जलकणास्तेषा, य आसारो-वेगवान्वर्षस्तेन हारी-रुचिरः ? पुन किंभूत 'तटजविकसत्केतकामोदरम्य' 'तटजानि-तीरोद्भवानि विकसंति प्रफुल्लानि यानि केतकानि-केतकीपुष्पाणि तेषा य आमोद परिमलस्तेन रम्य -प्रधानः । पुन किंभूतः ? परिणमयिता-पाचयिता । केषा ? काननोदुम्बराणा-काननोदुम्बरफलाना, अनेन तत्परिसरे वनराजिप्राचुर्य्यमुदुम्बराणि च घनागमसमये पच्यन्ते इ व्यज्यते ॥ ४६ ॥

नाम्ना रत्नाकरमथ पुरस्त्वं व्रजेर्वीक्षमाणो,
जज्ञे यस्माद्भुवनभयकृत्तत्पुरा कालकूटम्
यत्रासाध्यं निवसति जगद्दाहदक्षं जलानाम्—
त्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥४७॥

हे नाथ ! अथानन्तरं त्वं स्वं-निजं यत्तदोर्नित्ययोगात्तन्नाम्ना रत्नाकरं पुरो पुरो वीक्षमाणोऽवलोकमानः व्रजेर्गच्छेः । तदिति किं ? यस्मात्पुरात्पुरा-पूर्वं भुवनभयकृत्त्रिलोकीभीतिविधायक तत्कालकूट-विषं जज्ञे-जातं । तदिति किं ? यत्र कालकूटे जलानां-अपा मध्ये असाध्य भक्षणानन्तरमप्रतीकार्यं । हि-निश्चितं तत्तेजो निवसति-आस्ते । तदिति किं ? यत्तेज जगद्दाहदक्षं-जगतामपि दाहे दक्षं-प्रवीणं । पुन किंभूत ? अत्यादित्य-आदित्यमतिक्रान्त दिनकरादपि सातिशयमित्यर्थ । पुन किंभूत ? हुतवहमुखे सम्भृत-न्यस्तं आरोपितमित्यर्थः ॥ ४७ ॥

त्वामायान्तं तटवनचरा मेघनीलं मयूरा,
दृष्ट्वा दूरान्मधुरविरुतैस्तत्र ये संस्तुवन्ति ।
त्वं तान्नेमे ! ध्वनिभिरुदधेः सान्द्रितैः सन्निकृष्टः,
पश्चाददद्रिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथाः ॥४८॥

हे नाथ ! तत्र वेलातटे तटवनचरास्तटवनेषु चरन्ति-विहरन्तीति तटवनचराः, ये मयूरा मेघनीलं-मेघवन्नीलवर्णं त्वामायान्तमागच्छन्तं दूरात् दृष्ट्वा मधुरविरुतैः-श्रवणानुकूलध्वनिभिः संस्तुवन्ति-वर्णयन्ति । तान्मयूरान् हे नेमे ! त्वं उदधेः-समुद्रस्य सान्द्रितैर्घनतां प्राप्तैर्गर्जितैर्गर्जितानीव गर्जितानि तैर्ध्वनिभिः कृत्वा सन्निकृष्टः मयूराणां समीपीभवन्सन्पश्चान्नर्त्तयेथाः । किंभूतैर्गर्जितैः ? श्रद्रिग्रहणगुरुभिः-गिरिगुहाश्रयसमुद्भूतप्रतिरवगम्भीरैरयमर्थः-प्राक् त्वां मेघभ्रान्त्या दृष्ट्वा शिखिनः कूजिष्यन्ति । ततस्त्वं तेषां कूजितं सफलयन्तथाविधैर्गर्जितैर्नर्त्तयेथा इति ॥ ४८ ॥

उत्कल्लोला विपुलपुलिनाग्रेऽथ भद्राभिधाना,
सा ते सिन्धुर्नयनविषयं यास्यति प्रस्थितस्य ।
वातोद्धूतैर्हसति सलिलैर्या शशांकांशुगौरैः,
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ॥४९॥

हे नाथ ! अथेत्यनन्तरं अग्रे प्रस्थितस्य-प्रवृत्तस्य ते-तव सा भद्राभिधाना-सिन्धुर्नदी नयनविषयं दृग्गोचरं यास्यति । किंभूता सिन्धुः ? 'उत्कल्लोला' उत्-ऊर्ध्वं कल्लोला-वीचयो यस्याः सा तथा । पुनः किंभूता ? 'विपुलपुलिना' विपुलं पृथुलं पुलिनं-जलोज्झितं तटं यस्याः सा तथा । सेतिका ? या 'शशांकांशुगौरैः' शशांकश्चन्द्रस्तस्य ये अंशवः किरणास्तद्वद्धवलैः सलिलैः कृत्वा रन्तिदेवस्य-रन्तिदेवनाम्नः पृथिवीपतेः कीर्त्तिं हसति-तिरस्करोति । किंभूतैः सलिलैर्वातोद्धूतैः-वातेनोद्धूतानि उच्छलितानि वातोद्धूतानि तैः । किंभूतां कीर्तिं ? स्रोतोमूर्त्या नदीरूपेण भुवि परिणतां-पृथिव्यां प्रसृतां आत्मरूपपरित्यागेन रूपान्तरमापन्नामित्यर्थः ॥ ४९ ॥

उच्चैर्भिन्नाञ्जनतनुरुचौ हारिनीरं रथस्थे,
तस्यास्त्वय्युत्तरति सरितो यादवेन्द्र ! प्रवाहम्
वीक्षिष्यन्ते क्षणमनिमिषा व्योमभाजोतिदूरा-
देकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥

हे यादवेन्द्र ! श्रीनेमे ! त्वयि रथस्थे—स्यन्दनारूढे उत्तरति सति तस्या भद्रायाः प्रवाहं—ओघ उच्चैरतिशयेन क्षणं यावद्व्योमभाजो-गगनचारिणो मुनिदेवसिद्धविद्याधरादयोऽनिमिषा-निमेषरहिता सतः, अतिदूरादतिदूरभावात् भुवः पृथिव्या एकमेकसख्यं स्थूलमध्येन्द्रनील-स्थूलो मध्ये इन्द्रनीलो यस्य स तं मुक्तागुणमिव मौक्तिकमरिमेकावलिमित्यर्थ । प्रेक्षिष्यन्ते-प्रकर्षेण विलोकयिष्यन्ते अवनि कामिनी वक्ष स्थललुठदेकावलिविस्मयमाधास्यन्तीति भावः । किंभूत प्रवाहं ? 'हारिनीर' हारि-मनोहर नीर-जल यस्य स तं । किंभूते त्वयि ? भिन्नाजनतनुरुचौ-भिन्न यर्दितं-यदजनं तद्वत्तनुरुचि -शरीरकान्तिर्यस्य स तस्मिन् । अनेन श्यामल पृथुवपुरपि भगवतो दूरदेशावस्थितत्वेन तनुतया मध्येन्द्रनीलमणीयते सिन्धो प्रवाहोपि दूरभावात्पृथुरपि एकमुक्तावलीयत इति भाव. ॥ ५० ॥

तामुत्तीर्णः पुरमधिवसेरीश ! पौराभिधानं,
नानादेशागतपणचयैः पूर्णरम्यापणं तत् ।
यस्याकाशं स्पृशति निवहो वेश्मनां दिग्विभागान्
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥५१॥

हे ईश ! त्व ता—भद्राभिधा नदीमुत्तीर्णः सन्, तत् पौराभिधान-पुरमधिवसेस्तत्र निवास कुर्याः । किंभूत पुर ? 'नानादेशागतपणचयैः' नाना—देशाद्विविधविषयादागता ये पणचया -विक्रय्यसमूहास्तै 'पूर्णरम्यापण' पूर्णा-भृता रम्या आपणा—विपणयो यस्मिन्तत् । तदिति किं ? यस्य—पुरस्य वेश्मना मन्दिराणा निवहः श्रेणिरुच्चशिखरत्वादाकाश-नभः स्पृशत्याश्लिष्यति । वेश्मना निवहः किंकुर्वन् ? दशदिशसख्याकान्—दिग्विभागान्दिगन्तरालानि 'पुरवधूनेत्रकौतूहलाना' पुरस्य वध्व पुरवध्वस्तासा यानि नेत्रकौतूहलानि पुरवधूनेत्रकौतूह-

लानि तेषामत्र कौतुकं कारण विलोकित । कार्यं कारणे कार्योपचारात् न्यनयननिरीक्षिताना पात्रीकुर्वन् ॥ ५१ ॥

तस्माद्वर्त्मानघ ! तव कियद्गच्छतो भावि दुर्गं,
पङ्काकीर्णं नवतृणचितं तत्र तोयाशयानाम् ।
कुर्वन्नब्दः किल कलुषतां मार्गणैः प्रागरीणां,
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥५२॥

हे अनघ ! निष्पाप ! तव तस्मात्पुरात् गच्छतः कियत् कियन्मानं वर्त्मः दुर्गं—दुःखेन गम्य भावि—भविष्यति । किंभूतं वर्त्म ? 'पंकाकीर्णं' पंकः-कर्दमस्तेनाकीर्णं—व्याप्तं । पुनः किंभूत ? नवतृणचित-शष्पाकलित । यत्र वर्त्मनि अब्दो-मेघस्तोयाशयाना—जलाश्रयाणा कलुषता—मलिनतां कुर्वन । धारापातैर्वं गवतीर्वृष्टिभि' कमलान्यभ्यवर्षत्पूरयामास । केषा ? क नि ? कै ? क इव ? अरीणा मुखानि मार्गणैस्त्वमिव । यथा त्व प्राक् योगग्रहणात्पुरा अरीणा मुखानि मार्गणैर्बाणैरभ्यवर्षत्पूरयामास, तथायमपीति ॥ ५२ ॥

नानारत्नोपचितशिखरश्रेणिरम्यः पुरस्ते,
यास्यत्यक्ष्णोर्विषयमचलो मादनो गन्धपूर्वः ।
यं सोत्कण्ठो नवमिवपुनर्वीक्षितुं कान्तहर्षा-
दन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५३॥

हे नाथ ! ते—तव पुरोग्रे यत्तदोर्नित्ययोगात्स 'गन्धपूर्व.' गन्धेति पदं पूर्वं स्यति गन्धपूर्वो मादन -गन्धमादन इत्यर्थः । अचलः-पर्वतोऽक्ष्णोर्दृशोर्विषयं यास्यति-दृग्गोचरो भविष्यतीत्यर्थः । किंभूतोऽचल ? नानारत्नोपचितशिखरश्रेणिरम्यः नानारत्नैर्ये उपचितानि पुष्टानि यानि शिखराणि-शृगाणि तेषां या श्रेणिस्तया, रम्यः-प्रधान. । स इति क ? यं गन्धमादन कान्तहर्षाच्चारुप्रमोदात्पुनर्नव मिव वीक्षितुं-द्रष्टुं सोत्कण्ठ -सौत्सुक्यस्त्वमपि अत शुद्धो मध्ये पवित्रः सन् , वर्णमात्रेणैव कृष्णो भविता-भविष्यसि । तत्सम्पर्कात्तवापि मलापगमो भविष्यतीत्यर्थ' । भवितेति तृनादीनामनिर्दिष्टकालत्वात्कालत्रयेपि साधारण्येन भविष्यति तान्छीलिकस्तृन् ॥ ५३ ॥

यस्मिन्पूर्वं किल विरचतो वामभागे भवानीं,
देवीं वीक्ष्य त्रिपुरजयिनः स्वेच्छया केलिभाजः
जह्नोः पुत्री तदनु दधतीं तामिवेर्ष्यां सपत्न्याः,
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥५४

हे नाथ ! किलेति सम्भाव्यते । यस्मिन्गन्धमादने पूर्वं—प्रथम विरचित-गण्डाया पत्रलेखा विदधतास्त्रिपुरजयिनः—शम्भोर्वामभागे—वामप्रदेशे भवानीं—गौरीं देवीं—वीक्ष्य—दृष्ट्वा तदनुपश्चात्जह्नोः पुत्री—गगा सपत्न्या —गौर्य्यास्तामिति । यदसौममनपत्रलता विरचयत्येतस्या एव विरचयतीत्येवमीर्षा दधतीव शम्भो केशग्रहण—केशाकर्षण अकरोत् । कथभूता सती ? 'इन्दुलग्नोर्मिहस्ता' इन्दुश्चन्द्रमसो लग्ना—ऊर्म्मय एव-हस्तौ यस्याः सा । अनेन मुकुटीकृतत्वाच्चन्द्रस्य तल्लग्नहस्तत्त्वेन महेश्वरमग्रकेशेषु जग्राहेति प्रणयिनी त्व व्यज्यते । किंभूतस्य त्रिपुरजयिनः ? स्वेच्छया-स्वकामेन 'केलिभाजः' केलिं—क्रीडा भजतीति केलिभाक् तस्य केलिभाज । विरचत इति-रचण् प्रतियत्ने-धातुर्विपूर्व, अस्य चुरादिषु पाठात् शतृप्रत्यये विरचयत इति रूप स्यादतो 'विरचत' इति हा चिन्त्यं ॥ ५४ ॥

आरूढस्य स्फटिकमणिभूः श्वेतभानुप्रभाते,
यस्मिन्शैले विमलविलसत्कान्तितोयप्रवाहा ।
संक्रामन्त्या नवघनरुचा छायया स्वर्धुनीव,
स्यादस्थानोपगतयमुनासङ्गमेनाभिरामा ॥५५॥

हे नाथ ! यस्मिन्शैले गन्धमादनाभिधाने आरूढस्य-अधिरूढस्य ते-तव छायया-शरीरशोभया सक्रामन्त्या अन्तर्विशन्त्या स्फटिकमणिभूः उत्प्रेक्ष्यते—'अस्थानोपगतयमुनासगमेन' अस्थाने—प्रयागव्यतिरेकेण उपगतः—प्राप्तो यो यमुनासगमस्तेन प्रयागतीर्थव्यतिरिक्तस्थानसजातयमुनासंयोगेनेत्यर्थ । अभिरामा स्वर्धुनीव-गंगेव स्यात्—भवेत् । किंभूता स्फटिकमणिभूः ? 'श्वेतभा-

नुप्रभा' श्वेतभानुश्चन्द्रस्तद्वत्प्रभा-रुचिर्यस्या सा । पुनः किंभूता ? 'विमलविलसतकान्तितोयप्रवाहा' विमला-निर्मला विलसन्ती-उल्लसन्ती कान्तिरेव तोयप्रवाहो-जलधारा यस्या सा । किंभूतया छायया ? नवघनरुचा' नवो-जलभृतो यो घनस्तद्वद्रुक्कान्तिर्यस्याः सा तया । अयमर्थः त्वच्छरीरच्छविर्नीलास्ति, गिरेस्फटिकमणिभूमिः श्वेता । अतस्तत्र त्वच्छवि-प्रतिबिम्बेन उत्प्रेक्ष्यते । किं अस्थाने यमुनासगमवती गंगेयमिति । अत्र छायाशब्दः शोभार्थ । यदनेकार्थः-" छाया पंक्तौ प्रतिमाया-मर्कयोषित्यनातपे । उत्कोचे पालने कान्तौ, शोभाया च तमस्यपी" ति ॥ ५५ ॥

भास्वद्भास्वन्मणिमयबृहत्तुङ्गशृंगाग्रसंस्थाः,
संप्रत्युद्यत्परिणतफलश्यामला वामभागे ।
यस्मिन्जम्बूक्षितिरुहचया धारयिष्यन्ति सान्द्राः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥५६

हे नाथ ! यस्मिन्गन्धमादने शैले संप्रत्यधुना वामभागे-वामप्रदेशे सान्द्रा निविडा जम्बूक्षितिरुहचया-जम्बूवृक्षसघाः । 'शुभ्रत्रिनयनवृषोत्खातपकोपमेय' शुभ्रो-धवलो योसौ त्रिनयनवृषस्तेनोत्खातउत्पाटितो योसौ पङ्कः-कर्दमस्तेन सहोपमीयते या सा शुभ्रत्रिनयनवृषोत्खातपकोपमेया, ता शोभा धारयिष्यन्ति-वहिष्यन्ति । शैलशृंगाग्रस्य श्वेतत्वादीशवृषसाम्यं जम्बूतरुणा च, श्यामत्वात्पंकोपमेयनेति । किंभूता जम्बूक्षितिरुहचया ? 'भास्वद्भास्वन्मणिमयबृहत्तुंगशृंगाग्रसंस्था ' भास्वानिव-रविरिव भास्वन्ति-देदीप्यमानानि, मणिमयानि-स्फटिकमणिप्रधानानि बृहन्ति, विपुलानि तुगान्युच्चानि यानि शृगाग्राणि तेषु संतिष्ठन्ते, ये ते भास्वद्भास्वन्मणिमयबृहतुगशृंगाग्रसस्था । पुन किंभूताः ? 'उद्यत्परिणतफलश्यामला.' उद्यन्ति परिणतानि पक्वानि यानि फलानि तै', श्यामला-अतिशयेन कृष्णवर्णा ॥ ५६ ॥

श्रुत्वा यांतं द्रुतमुपगतास्तत्र वेदानिकाया—
स्त्वां याचन्ते प्रथितयशसं येऽर्थिनो दौःस्थ्यदीनाः ।

तान्कुर्वीथाः समभिलषितार्थप्रदानैः कृतार्था-
न्नापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥५७॥

हे नाथ ! तत्र शैले ये अर्थिनो-याचकास्त्वा यातं-द्वारिका प्रतिगच्छ-न्तं मत्वा वेदानिकाया. पुर्य्या द्रुतं शीघ्रमुपागताः-प्राप्ताः । द्विकर्मकत्वात्-याचृ धातोः-साक्षादनुक्तमपि द्रव्यमिति कर्मयोज्य। याचंते-प्रार्थयन्ते । किंभूतं त्वा ? प्रथितयशस-विख्यातकीर्त्तिं । किंभूता अर्थिन ? 'दौस्थ्यदीना.' दौस्थ्येन-दारिद्रयेण दीना दौस्थ्यदीनास्तान्-अर्थिनः समभिलषितार्थप्रदानैः-मनोवाञ्छि-तार्थवितरणैः कृत्वा कृतार्थान्-कृतकृत्यान् त्वं कुर्वीथाः-विदधीथाः । अर्थान्त-रन्यासेन कारणमाह-हि-यस्मादुत्तमाना सपद , आपन्नार्त्तिप्रशमनफलाः-आ-पन्न-आपद्गतस्तस्यार्त्ति-पीडा तस्याः यत्प्रशमनं तदेव फलं यासा ता । तथा चानेकार्थे -"आपन्न सापदि प्राप्ते च" । अत्र तावदापन्ना याचकास्तेषामर्थ-दानेनार्त्तिशान्तिं कुर्य्या इति भावः ॥ ५७ ॥

आकर्ण्याद्रिप्रतिरवगुरुं वानरास्त्वत्सकाशे,
क्रोधाताम्रा जनमुखरवं तत्र येभिद्रवन्ति ।
तान्योधानां विमुखय पुनर्दारुणैर्ज्यानिनादैः,
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५८॥

हे नाथ ! तत्र शैले ये वानरा.-कपयस्त्वत्सकाशे-त्वत्समीपे 'अद्रिप्रति-रवगुरु' अद्रौ-शैले य. प्रतिरव -प्रतिशब्दस्तेन गुरुर्गभीरस्तं । जनमुखरवं-जनाना त्वदभिमुखागताना लोकाना यो मुखरवस्तमाकर्ण्य-श्रुत्वा अभिद्रवन्ति अभिमुखमागच्छन्ति । अभिपूर्वो द्रु गतौ-धातुर्ये गत्यर्थास्ते प्राप्त्यर्थाः इति वच-नात् । तान्वानरान्पुनर्भूयो योधाना-शूराणा ज्यानिनादैः-प्रत्यञ्चाविस्फारैः कृत्वा विमुखय-पराङ्मुखीकुरु । एतदेवार्थान्तरन्यासेन निरूपयति-के वा न स्युर्वा, समु-च्चयेन केवलमेत एवान्येपि केवा न भवेयुः ? परिभवपद । कीदृशाः सन्तो ? 'निष्फलारम्भयत्नाः' आरम्भे यत्न उपक्रम आरभयत्नः, निष्फलआरभयत्नो येषा ते तथा, लोकैरुपहास्यमानाः-पराभवभाजनं भवन्तीत्यर्थः ॥ ५८ ॥

तस्मिन्नद्रौ निवसति विभुः स स्वयंभूर्भवाख्यो,
देवः सेवापरसुरगणैर्वन्द्यपादारविन्दः ।
यद्ध्यानेनापहृतदुरिता मानवाः पुण्यभाजः,
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५९ ॥

हे नाथ ! यस्मिन्नद्रौ—गन्धमादनगिरौ स भवाख्य—ईश्वराभिधो देवो निवसति-निवास विधत्ते । किंभूतो देवः ? विभुर्व्यापक समर्थो वा । पुनः किंभूतः ? स्वयभूः' स्वयं भवतीति परानुत्पाद्यत्वात्स्वयंभूः । पुन किम्भूतः ? सेवापरसुरगणैर्वन्द्यपादारविन्द —नमस्करणीयचरणकमल । स इति क ? 'यद्ध्यानेन' यस्येश्वरस्य ध्यानेन—मनःस्मरणेन अपहृतदुरिता—अपनीतपापा, मानवा. श्रद्दधाना -श्रद्धालव सन्तः, स्थिरगणपदप्राप्तये—स्थिरमविनश्वर यद्गणपद तस्य प्राप्तिः स्थिरगणपदप्राप्तिस्तस्यै सकल्पन्ते—समर्था भवन्ति । किंभूताः ? 'पुण्यभाज 'पुण्य भजन्त इति पुण्यभाज । शम्भुध्यानेन प्रध्वस्तपातका विनाशिशरीर परित्यज्य भक्तिभाज शाश्वतीमीश्वरगणपदवीं लभन्त इति तात्पर्यं ॥ ५६ ॥

नीपामोदोन्मदमधुकरीगुंजनं गीतरम्यं,
केका वेणुक्वणितमधुरा बर्हिणां चारुनृत्यम् ।
श्रोत्रानन्दी मुरजनिनदस्त्वत्प्रयाणे यदि स्या—
त्सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥६०॥

हे नाथ ! त्वत्प्रयाणे—त्वदीयप्रस्थाने यदि चेत् 'श्रोत्रानंदी' श्रोत्राणि आनन्दयतीति श्रोत्रानन्दी, मुरजनिनदो—मृदंगोद्भवध्वनि. स्यादिति भविष्येत् । "वर्त्तमानसामीप्ये वर्त्तमानवद्वे" ति वचनात् । तदा ननु—निश्चित पशुपतेरवयवे समुदायोपचारात्पशुपतिचरणन्यासे सगीतार्थ —प्रेक्षाविधिः समग्रः-परिपूर्णस्तत्र पर्वते भावी—भविष्यति । अन्यनृत्यकारणाना स्वत एव सिद्धत्वात्तथाहि—नीपामोदोन्मदमधुकरीगुञ्जन ' नीपामोदैर्नीपपुष्पगन्धैरुन्मदा—दृप्ता या मधुकर्य-

स्तासा यद्गुंजन तदेव, 'गीतरम्य' गीतवत्सुगातृगानवद्रम्य-प्रधान। तथा केका-मयूरध्वनिः 'वेणुक्वणितमधुरा' वेणुक्वणितवत्-वाशिकवादितवेणुनिक्वाणवन्मधुरा। तथा बर्हिणा चारुनृत्यं। एव सर्वोपि सगीतोपायः सम्मिलितोस्ति। पर यदि मुरजनिनदो भविष्येत्, तदा पूर्णः सगीतार्थो भविष्यतीति भावः ॥६०॥

तस्माद्गच्छन्नथ पथि भवान्वीक्षिता वेणुलाख्यं,
शैलं नीलोपलचयमयाशेषसानुच्छ्रयन्तम्।
व्याप्याकाशं नवजलभृतां सन्निभो यो विभाति,
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥६१॥

हे नाथ! अथेत्यनन्तर भवास्त्व अस्माद्गन्धमादनाद्गच्छन्पथि मार्गे त वेणुलाख्य-शैल वीक्षिता-द्रक्ष्यसि। किंभूत त? 'नीलोपलचयमयाशेषसानुच्छ्रय' नीलोपला-नीलमणयस्तेषा यश्चयः-सघस्तत्प्रधानानि नीलोपलचयमयानि यानि अशेषाणि-समस्तानि सानूनि-प्रस्थानि तेषामुच्छ्रय उदग्रता विद्यते यस्मिन्स तं। अत्र प्राधान्ये मयट्। तमिति क? यः-शैलः आकाश व्याप्य नवजलभृता-नवीनमेघाना सन्निभः-सदृशो विभाति-शोभते। किंभूतः शैल? उत्प्रेक्ष्यते-विष्णोर्वासुदेवस्य श्यामः-कृष्णः पाद इव। किंभूतस्य विष्णोः? बलिनियमनाभ्युद्यतस्य बलिबन्धने उद्यतस्य-उद्यमवतः ॥ ६१ ॥

तांस्तान्ग्रामांस्तमपि च गिरिं दक्षिणेन व्यतीत्य,
द्रष्टास्यग्रे सितमणिमयं सौधसंघं स्वपुर्याः।
क्रान्त्वा वप्रं वियति विशदैः शोभते योंशुजालै
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥६२॥

हे नाथ! त्व तास्तान् अन्तराले पूर्वपरिचितान्ग्रामानपि च तं-गिरिं वेणुलाख्यं दक्षिणेन-दक्षिणा दिग्विभागे। दक्षिणेनेत्यव्यय, "एनबन्यतरस्यामदूरे पचम्याः" इति-एनप् प्रत्ययः। व्यतीत्य-अतिक्रम्य, अग्रे पुर -स्वपुर्याः द्वारिकायाः सितमणिमय-श्वेतमणिप्रधान, यत्तदोर्नित्ययोगात्त सौधसघं-नृपम-

न्दिरसमूहं द्रष्टास्यवलोकयितासि । तमिति कं ? यः सौधसंघ. वियत्याकाशे विशदैर्निर्मलैरंशुजालै-किरणसमूहैः वप्रं-प्राकारपीठभूमिं क्रान्त्वा-उल्लंघ्य राशीभूतः पुञ्जीभूत उत्प्रेक्ष्यते-त्र्यम्बकस्य-महेश्वरस्य अट्टहास इव ॥ ६२ ॥

प्रत्यासत्तिं विशदशिखरोत्संगभागे पयोदे,
नीलस्निग्धे क्षणमुपगते पुण्डरीकप्रभस्य ।
शोभा काचिद्विलसति तनोर्हारिणी यस्य संप्र—
त्यंसन्यस्ते सति हलभृतो मेचके वाससीव ॥६३॥

हे नाथ ! यस्य 'पुण्डरीकप्रभस्य' पुण्डरीकं-सिताम्भोजं तद्वत्प्रभा-छाया स्य स, तस्य शैलस्य सम्प्रति 'विशदशिखरोत्सङ्गभागे' विशदानि-धवलानि नि शिखराणि-शृगाणि तेषा य उत्संगभागः-क्रोडैकदेशः तस्मिन्हारिणी-नोहरा शोभा काचिदनिर्वाच्या विलसति, क ? सति नीलस्निग्धे-कृष्णारुत्ते ोदे-मेघे क्षण यावत् प्रत्यासत्तिं नैकट्यमुपगते-प्राप्ते सति उत्प्रेक्ष्यते-कस्येव ? लभृत इव-बलभद्रस्येव, यथा हलभृतस्तनोरसन्यस्ते मेचके-कृष्णवर्णे वाससि-भा काचिद्विलसति, तथैतस्यापीति । बलभद्रोपि शुभ्रवर्ण इति प्रसिद्धि ॥६३॥

प्राप्योद्यानं पुरपरिसरे केलिशैले यदूनां,
विश्रामार्थं क्षणमभिरतिं गोमतीवारि पश्यन् ।
उत्सर्पद्भिर्दधदिव दिवो वर्त्मनो वीचिसंघैः,
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥६४॥

हे नाथ ! त्व पुरपरिसरे यदूना केलिशैले क्रीडागिरौ उद्यानं प्राप्य क्षणं वद्विश्रामार्थं-खेदापनयनार्थं अभिरतिं कुरु-अवस्थानं विधेहि । किंकुर्वन् सन् ? मतीवारि पश्यन्सन् । उत्प्रेक्ष्यते-गोमतीवारि उत्सर्पद्भि -ऊर्द्ध्वं प्रसरद्भिर्वीचि-घैः-कल्लोलराजिभिर्दिवो वर्त्मनः-नभो मार्गस्य सोपानत्व-सचारिसोपानपरम्परा धदिव-बिभ्रदिव । किंभूतस्त्वं ? मणितटारोहणाय । 'अग्रयायी' अग्रे सर्वेपा-पि पुरो यातीत्येवंशीलोग्रयायी ॥ ६४ ॥

तत्रासीनो मुररिपुयशो निश्चलः किन्नरीभिः,
शृण्वंस्तिष्ठेः श्रुतिसुखकरं गीयमानं मुहूर्त्तम् ।
शब्दैरश्मस्खलितरथजैर्मेदुरैर्नाम्बुराशेः,
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥६५॥

हे नाथ ! तत्र केलिशैले त्व आसीन—उपविष्टः सन्, यत्तदोर्नित्ययोगात् याभिः किन्नरीभिर्गीयमानं मुररिपुयशो-विष्णुकीर्त्तिं मुहूर्त्तं यावच्छृण्वन्श्रुतिविषयी कुर्वन्, निश्चलस्तिष्ठेर्गतिनिरोधं कुर्य्याः । कथ ? यथा भवति-श्रुतिसुखकर—श्रोत्रानुकूल यथा स्यादिति, ताः-किन्नरीः श्रवणपरुषै —कर्णकठोरैर्मेदुरैः पुष्टैरम्बुराशेर्जलधेर्गर्जितै शब्दैर्नभाययेर्नभयाकुलाः कुर्य्याः । किभूतैर्गर्जितैरश्मस्खलितरथजैः—अश्मभिः-पाषाणै स्खलितः—सघट्ट प्राप्तो यो रथस्तस्माज्जाता अश्मस्खलितरथजास्तै. । किभूतास्ता ? क्रीडालोला —क्रीडाया साभिलाषा । भाययेरित्यत्र गर्जिताना साधनत्व भय प्रति कुश्चिकयैनं भाययतीतिवत् न हेतुभयं, तेनात्वात्मनेपदे न भवतः ॥ ६५ ॥

सान्द्रोन्निद्रार्जुनसुरभितं प्रोन्मिषत्केतकीकं,
हृद्यं जातिप्रसवरजसा स्वादमत्तालिनादैः
नृत्यत्केकामुखरशिखिनं भूषितोपांतभूमिं,
नानाचेष्टैर्जलदललितैर्निर्विशेस्तं नगेन्द्रम् ॥६६॥

हे नाथ ! त्वं त—नगेन्द्र—क्रीडाशैल निर्विशेरुपभुजीथाः । किभूत तं 'सान्द्रोन्निद्रार्जुनसुरभित' सान्द्रा—निरन्तरा उन्निद्रा —प्रफुल्ला येर्जुनास्तैः, सुरभित-सुगन्धिता प्रापित । पुनः किंभूत ? 'प्रोन्मिषत्केतकीकं' प्रोन्मिषन्त्यो विकसन्त्यः केतक्यो यस्मिन्स त । "नद्यृतश्चे" ति वहुव्रीहेः कप् । पुन किंभूतं ? 'जातिप्रसवरजसास्वादमत्तालिनादैः' जातिप्रसवाना—जातिपुष्पाणां यद्रजः-परागस्तस्य य आस्वादस्तेन मत्ता ये अलयो—भ्रमरास्तेषा नादैर्गुञ्जितै र्हृद्यं-मनोहर । पुनः किभूत ? 'नृत्यत्केकामुखरशिखिन' नृत्यन्तः केकामुखरा वर्हिर्ध्वनिवाचाला शिखिनो—मयूरा यत्र तं । पुन किंभूत ? नानाचेष्टैर्विविध

निस्यन्दैर्जलदललितैर्मेघविलासैर्भूषितोपान्तभूमिं भूषिता-अलंकृता उपान्तभूमिः-पर्यन्तावनिर्यस्य स तं ॥ ६६ ॥

तस्या हर्षादविकृतमहास्ते प्रवेशाय पुर्या
निर्यास्यन्ति प्रवरयदवः सम्मुखाः शौरिमुख्याः ।
या कालेऽस्मिन्भवनशिखरैः प्रक्षरद्वारि धत्ते,
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६७ ॥

हे नाथ ! तस्याः पुर्या-द्वारिकायाः सकाशात्हर्षात्प्रमोदात् शौरिमुख्याः-केशवप्रमुखा प्रवरयदवस्ते-तव प्रवेशाय-प्रवेशार्थं सन्मुखा-अभिमुखा निर्यास्यन्ति-निर्गमिष्यन्ति । किम्भूतास्ते ? 'अविकृतमहाः' अविकृता-विकाररहितास्त्वत्प्रवेशार्थं महा उत्सवा येषां ते तथा । तस्या इति कस्याः ? या अस्मिन्काले-वर्षासमये भवनशिखरैर्मन्दिराग्रैरभ्रवृन्द धत्ते । किंभूतमभ्रवृन्दं ? 'प्रक्षरद्वारि' प्रक्षरज्जलद्वारि यस्मात्तत् । पुरी केव ? कामिनीव । यथा-कामिनी अलकं-केशं मुक्ताजालग्रथित-मुक्ताफलसमूहशबलितं धत्ते । अत्र पुर्याः कामिनीत्वं घनपटलस्यालकत्व प्रक्षरत्पानीयस्य मुक्ताफलग्रथितत्वमुपमानितमिति । अत्रोपमालङ्कारः ॥ ६७ ॥

शश्वत्सान्द्रस्वतनुमहसं प्रोल्लसद्रत्नदीपा,
मानप्रांशुं शिखरनिवहैर्व्योममार्गं स्पृशन्तः ।
गौरज्योत्स्नाविमलयशसं शुभ्रभासः सुधाभिः,
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६८ ॥

हे नाथ ! यत्र द्वारिकायां प्रासादास्त्वां तुलयितु-अनुकर्तुं तैस्तैर्विशेषैरभिधीयमानसदृशधर्मैरलं समर्थाः । किम्भूतं त्वां ? 'शश्वत्सान्द्रस्वतनुमहसं' शश्वन्निरन्तरं सान्द्रं-घनं स्वतनोः-स्वशरीरस्य महस्तेजो यस्य स तं । किंकुर्वन्त प्रासादाः ? 'प्रोल्लसद्रत्नदीपाः' प्रोल्लसन्ति-प्रभाभिर्भास्वन्ति रत्नान्येव दीपा येषु ते तथा । किम्भूतं त्वां ? 'मानप्रांशुं' मानेन प्रांशुरुच्चैस्तरस्तं मान-

प्राशु । किम्भूताः प्रासादा ? शिखरनिवहैर्गृहाग्रभागसमूहैर्व्योममार्ग-नभः पथं स्पृशन्तः-आश्लिष्यन्तः । किम्भूत त्वा ? 'गौरज्योत्स्नाविमलयशस' गौरा-शुभ्रा या ज्योत्स्ना-कौमुदी तद्वद्विमल यशो यस्य स त । किम्भूताः प्रासादा ? सुधाभिर्लेपै शुभ्रभासः-श्वेतकान्तय ॥ ६८ ॥

या मुद्दामाखिलसुररिपून्माथिनो दानवारेः,
साहाय्याय प्रथितमहसोऽध्यासते योधवर्गाः
नानादैत्यप्रहरणभवैः संगरेषु स्वकीर्त्या,
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥ ६९ ॥

हे नाथ ! यां-पुरीं दानवारे -कृष्णस्य साहाय्याय-सहायत्वार्थे योधवर्गा -शूरसघा अध्यासन्ते-अधितिष्ठन्ति । किंभूतस्य दानवारे ? 'उद्दामाखिलसुर-रिपून्माथिन.' उद्दामा -स्वशौर्येणोत्कटा अखिला -समस्ता ये सुररिपवो-दैत्या-स्तान्उन्मथतीत्येवंशील उद्दामाखिलसुररिपून्माथी, तस्य उद्दामाखिलसुररिपू-न्माथिन । पुन किंभूतस्य ? प्रथितमहसो-विख्याततेजस । किंभूता योधवर्गाः ? सगरेषु-रणेषु नानादैत्यप्रहरणभवैर्नानादैत्याना-विविधासुराणा प्रहरणेभ्यः भवा-उत्पन्ना नानादैत्यप्रहरणभवास्तैश्चन्द्रहासव्रणाकैः-खड्गाकिणाकै, स्वकी-र्त्या-स्वयशसा खड्गव्रणाकितत्वेन तेषा विशिष्टकीर्तेरुत्थानमायत उक्तम्-"खण्डिता एव शोभन्ते, वीराध्वरपयोधरा" इति । 'प्रत्यादिष्टाभरणरुचय ' प्रत्यादिष्टा-निराकृता आभरणाना रुक्-कान्तिर्यैस्ते, सौवर्णाभरणानि परिदध-तीत्यर्थः ॥ ६९ ॥

व्याधिर्देहान्स्पृशति न भयाद्रक्षितुः शार्ङ्गपाणे-
र्मृत्योर्वार्त्ता श्रवणपथगा कुत्रचिद्वासभाजाम्
कामक्रीडारससुखजुषां यच्छतामर्थिकामा—
न्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥७०॥

हे नाथ ! यत्रेत्याध्याह्रियते । यत्र पुर्यां रक्षितु.-लोकाना रक्षकस्य शार्ङ्गपाणेर्विष्णोर्भयात्व्याधिर्मान्द्यं देहान न स्पृशति । तथा 'वासभाजा' वास-

द्वारिकानिवास भजन्तीति वासभाजस्तेषा, तन्नगरनिवासिनां कुत्रचित् पुरातन-कथाप्रबन्धादिश्रवणे मृत्योर्मरणस्य वार्त्ता 'श्रवणपथगा'-श्रोत्रग्राह्या वर्त्तते । तथा च पुनर्यत्र खलु-निश्चयेन वित्तेशाना-धनेश्वराणा यौवनात्तारुण्यादन्यद्वयो नास्ति । किंभूताना वित्तेशाना ? 'कामक्रीडारससुखजुषां' कामक्रीडारसस्य-मनोभवकेलिरसस्य यत्सुख तज्जुषन्ते-सेवन्त इति कामक्रीडारससुखजुषस्तेषां । पुन· किम्भूताना ? अर्थिकामान्-याचकमनोरथान्यचछता-धातूनामनेकार्थत्वा-त्पूरयताम् ॥ ७० ॥

कर्णे जातिप्रसवममलं केतकं केशपाशे,
कस्तूरीभिः कृतविरचनागल्लयोः पत्रवल्ली
कण्ठे माला ग्रथितकुटजा मण्डनं भावि काम्यं,
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥७१॥

हे नाथ ! यस्या पुर्य्या वधूना त्वदुपगमजं-भवदागमसमयसभवं काम्य-मभिलषणीय मण्डनं-प्रसाधनं भावि-भविष्यति । तत्किं ? अमलं-निर्मलं, कर्णे जातिप्रसव-जातिपुष्पं । तथा केशपाशे-केशकलापे केतकं-केतकीपुष्पं । तथा वधूना गल्लयोर्गण्डयो कस्तूरीभिः कृतविरचना-विहितमकर्य्यादिरूपरचना पत्रवल्ली-पत्रलता, तथा कण्ठे 'ग्रथितकुटजा' ग्रथितानि कुटजानि-कुटजपुष्पाणि यस्या सा । तथाविधामालास्रक् । तथा च पुन सीमन्ते केशमार्गे नीप-कदम्बकुसुमं, [illegible] सर्वमपि मण्डनं वधूना त्वद्गमनेन भविष्यतीति भावः ॥ ७१ ॥

[illegible]स्यां रम्यं युवजनमनोहारिवारांगनानां,
[illegible] लास्यं तालानुमतकरणं भास्यति त्वत्प्रवेशे ।
[illegible]च्छन्तीनां तदवगमनानन्दभाजां प्रसादं,
[illegible] त्वद्गंभीरध्वनिषु शनकैःपुष्करेष्वाहतेषु ॥ ७२ ॥

हे नाथ ! यस्या-द्वारिकाया त्वत्प्रवेशे वाराङ्गनाना-पण्याङ्गनाना रम्य-प्रधानं [illegible]यं नाट्य भास्यति-शोभिष्यते । केषु ? सत्सु पुष्करेषु-तूर्यमुखेषु । यदने-"पुष्कर तूर्यमुखे पद्मे च" इत्यादि । आहतेषु-वाद्यमानेषु, सत्सु कथं ?

शनकैर्मन्द मन्दं । किल नर्त्तनावसरे कठोररवो न घटते । किम्भूतेषु ? 'गम्भीरध्वनिषु' गम्भीरो-गुरुतरो ध्वनिर्येषु तेषु । किंभूतं लास्य ? 'युवजनमनोहारि' युवजनाना-तरुणलोकाना मनासि हरतीति यत्तत्तथा । पुनः किंभूत ? 'तालानुगतकरणं' तालश्चच्चपुटादिस्तेनानुगत-सम्बद्ध करण गीतभेदः अगहारभेदो वा, स्थिरहस्तपर्यस्ततारकादिद्वात्रिंशत्प्रकारो यस्मिन्तत्तथा । किंभूताना वारांगनाना ? 'तदवगमनानन्दभाजा' तस्य-लास्यस्य यदवगमन-ज्ञान तेनानन्द-प्रमोद भजन्तीति तदवगमनानन्दभाजस्तासा । पुनः किम्भूताना ? त्वद्भवतः सकाशात्प्रमाद् अनुनय वाञ्छन्तीनाम् ॥ ७२ ॥

संसक्तानां नवरतरसे कामिभिः कुट्टिमानां,
प्रष्ठेष्वंतः कृतविरचना घर्म्मवार्यंगनानाम् ।
यस्यां ग्रीष्मे शिशिरकिरणस्यांशुभिर्यामिनीषु
व्यालुम्पन्ति स्फुटजललवस्यंदिनश्चन्द्रकान्ताः ॥७३॥

हे नाथ ! यस्या-द्वारिकाया-अङ्गनाना घर्मवारि-परिस्वेदजलं ग्रीष्मे-उष्णकाले यामिनीषु चन्द्रकान्ताश्चन्द्रमणयः व्यालुम्पन्ति-स्फेटयन्ति । किम्भूताश्चन्द्रकान्ता ? शिशिरकिरणस्य-चन्द्रस्य अंशुभिः-किरणैः 'स्फुटजललवस्यंदिन' स्फुटं-प्रकट जललवान-पानीयबिन्दून् स्यन्दन्ते-क्षरन्तीति, स्फुटजललवस्यन्दिनः । किम्भूतानामङ्गनाना ? नवरतरसे-नवीनसम्भोगरसे, संसक्तानामासक्ताना । किम्भूताश्चन्द्रकान्ताः ? कामिभिः-कामुकैः कुट्टिमाना-पाषाणादिबद्धभूमीना पृष्ठेषु-अन्तर्मध्ये 'कृतविरचनाः' कृत-विहित विरचनं येषां ते तथा ॥ ७३ ॥

गत्वा यूनां रजनि समये धूप्यमानेषु लीला-
वेश्मस्वन्तर्युवतिनिहितै रत्नदीपैर्निरस्ताः ।
जालैर्यत्रावतमसचयाः साध्वसेनेव भूयो,
धूमोद्गारानुकृतिनिपुणाः जर्जरा निष्पतन्ति ॥७४॥

हे नाथ ! यत्र द्वारिकाया रजनि समये अवतमसचया-अन्धकारसमूहा यूना-तरुणाना धूप्यमानेपु-लीलावेश्मसु गत्वा जालैर्गवाक्षमार्गैर्भूयः-पुनर्जर्जरीभूताः शतशः स्फुटिता सन्तो निष्पतन्ति-निर्गच्छन्ति । किम्भूता अवतमसचयाः ? 'धूमोद्गारानुकृतिनिपुणाः' धूमस्य उद्गारः-निस्सारस्तस्य या अनुकृतिरनुकारस्तस्मिन विषये निपुणाः-दक्षाः । किल धूमोद्गारादिजालविवरैर्जर्जरीभूय निर्गच्छति । तथा अमी अपि । उत्प्रेक्ष्यते-साध्वसेनेव-भयेनेव अन्योपि यः किल परेषा गृहे दोषमुत्पादयति । स खलु भयत्रस्तो गवाक्षादिविवरेभ्यो झंपा ददाति, निष्पतितश्च जर्जरी भवति । पुनः किम्भूता ? 'अन्तर्युवतिनिहितैः' अन्तर्वासगृहाणा मध्ये युवतीभिः-स्त्रीभिर्निहितैर्न्यस्तै रत्नैः रत्नदीपस्तैर्निरस्ता-अपाकृताः ॥ ७८ ॥

रात्रौ यस्यामुपसखिभृशं गात्रसंकोचभाजां,
रागेणान्धैः शयनभुवनेपूल्लसद्दीपवत्सु ।
प्रेम्णा कान्तैरभिकुचयुगं हृद्यगन्धिर्वधूनां,
ह्रीमूढानां भवति विफलः प्रेरितश्चूर्णमुष्टिः ॥७९॥

हे नाथ ! यस्या द्वारिकाया शयनभवनेपु-वासगृहेपु रात्रौ रागेणान्धैः कान्तैः-प्रियतमैः प्रेम्णा-स्नेहेन वधूनामभिकुचयुग-स्तनयुगमसन्मुख प्रेरितश्चूर्णमुष्टिश्चूर्णं-पटवासादिसुगन्धद्रव्य तस्य मुष्टिर्विफलो-निष्फलो भवति, तासा कुचयुगे न लगतीत्यर्थः । किम्भूतेपु शयनभवनेपु ? 'उल्लसद्दीपवत्सु' उल्लसन्तः प्रभाभिर्देदीप्यमाना ये दीपास्ते विद्यन्ते येपु तेपु, उल्लसद्दीपवत्सु । किम्भूताना वधूना ? ह्रीमूढाना-त्रपातरलिताना, अत्र ह्रीमूढत्वकारणगर्भित तासा विशेषणमाह । पुनः किम्भूताना ? भृशमत्यर्थं, 'उपसखि' सख्या उपसमीपे इति उपसखि 'गात्रसकोचभाजा' गात्रसकोच भजन्तीति गात्रसङ्कोचभाजस्तासा । किल तासा-सन्निहितसखीना प्रदीपप्रभयावलोकनाल्लज्जया गात्रसंकोचो भवति । ततश्च यावता कान्तैः प्रेर्यते चूर्णमुष्टिस्तावता ताभिः स्याङ्ग सकोचित ततश्चूर्णमुष्टिर्विफलो भवतीति भावार्थः । किम्भूतो ? हृद्यगन्धिः-प्रधानामोदः ॥ ७९ ॥

गायन्तीभिस्तदमलयशो वारसीमन्तिनीभिः,
सार्कं वाद्यन्मधुरमरुजं तारनादान्यपुष्टम् ।
यस्यां रम्यं सुरभिसमये सोत्सवाः सीरिमुख्या,
बद्धापानं बहिरुपवनं कामिनो निर्विशन्ति ॥७६॥

हे नाथ ! यस्या-द्वारिकाया बहिरुपवन-बाह्योद्यान सुरभिसमये-वसन्तकाले सीरिमुख्या-बलप्रमुखा कामिनो निर्विशन्ति-उपभुञ्जते । कथ ? यथा भवति । 'बद्धापानं' बद्धमापान-मद्यपान यत्र तद्बद्धापानं बद्धगोष्ठि यथा स्यात्तथा । कथ निर्विशन्ति ? वारसीमन्तिनीभिः-पण्यागनाभिः सार्द्धं, किकुर्वन्तीभिस्त्वदमल-यशस्तव अमल यद्यशस्तद्गायन्तीभि. । किम्भूतमुपवन ? 'वाद्यन्मधुरमरुज' वाद्यन्मधुर -श्रवणानुकूलो मरुजो यस्मिन्तत । पुनः किम्भूत ? 'तारनादान्य-पुष्ट' तारनादा-उच्चैःशब्दा अन्यपुष्टा -कोकिला यस्मिन्तत् । पुनः किम्भूत ? रम्य-प्रधान् । किम्भूतास्ते ? सोत्सवाः समहा. ॥ ७६ ॥

उद्यत्कामालसयुवतिभिः सेव्यमानैः सरोजो-
द्गन्धान् यस्यां सुमधुररसानैक्षवानापिबद्भिः ।
निर्गम्यन्ते शरदि यदुभिः सद्मपृष्ठेषु कीर्त्या,
नित्यज्योत्स्ना प्रतिहततमो वृत्तिरम्याः प्रदोषाः ॥७७॥

हे नाथ ! यस्या-द्वारिकाया शरदि-घनात्यये यदुभिर्यादवै सद्मपृष्ठेषु-मन्दिरोपरिभागेषु प्रदोषरजनीमुखानि निर्गम्यन्ते-अतिवाह्यन्ते । किम्भूताः प्रदोषाः ? 'कीर्त्या नित्यज्योत्स्ना प्रतिहततमो वृत्तिरम्याः' कीर्तिरेव धवलत्वा-दाममन्तान्नित्यं-अनवरत या ज्योत्स्ना-कौमुदी तया प्रतिहता या तमोवृत्तिः-अन्धकारवृत्तिस्तया रम्याश्चारव. । किम्भूतैर्यदुभि ? 'उद्यत्कामालसयुवतिभिः' उद्यन्-उदय प्राप्नुवन योसौ कामस्तेनालसा या युवतयस्ताभि सेव्यमानै । किंकुर्वद्भि ? 'ऐक्षवान्' इक्षोरिमे विकारा ऐक्षवास्तान्, सुमधुररसान्-अतिशयेन मृष्टरसान् आपिबद्भिरासमन्तात्पान कुर्वद्भि । किम्भूतानैक्षवान् ? 'सरो-

जीवन्धान् सरोजगन्धमुत्क्रम्य गन्धो येषां ते सरोजोद्गन्धास्तान् ।
वादित्वा" न्मध्यमपदलोप ॥ ७७ ॥

कौन्दोत्तंसास्तुहिनसमये कुंकुमालिप्त____,
सान्द्रच्छाये शुचिनि तरुभिर्गोमतीरम्यतीरे ।
रूपोल्लासाद्विजितरतयः कन्दुकाभैः सलीलं,
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥७८॥

हे नाथ ! यत्र यस्या-द्वारिकाया गोमतीरम्यतीरे कन्या सलील-लीलया-सहित यथास्यात्तथा संक्रीडन्ते । कैर्मणिभिः । किम्भूतैः ? 'कन्दुकाभै' कन्दुकवदाभान्ति-शोभन्त इति कन्दुकाभास्तै । किम्भूताः कन्या ? अमरप्रार्थिता रूपातिशयाद्देवैरभिलषिता, देवा एव तासां पतित्वमर्हन्ति न मानवा इति भावः । पुनः किम्भूता ? 'कौन्दोत्तंसाः' कुन्दस्यायं कौन्द स उत्तम-शेखरो यासां ता. कौन्दोत्तंसाः । क ? तुहिनसमये-हेमन्तकाले । पुन किम्भूताः ? 'कुङ्कुमालिप्तदेहाः' कुङ्कुमेन-घुसृणेन आलिप्तो देहो यासां ता । पुन किम्भूताः ? 'रूपोल्लासाद्विजितरतयः' अतिशायिरूपविलासात विजिता रति -कामस्त्री याभिस्ता । किम्भूते गोमतीतीरे ? तरुभिर्वृक्षैः 'सान्द्रच्छाये' सान्द्रा-निरंतरा छाया यस्मिंस्तस्मिन्सान्द्रच्छाये । पुन किम्भूते शुचिनि-पवित्रे ॥ ७

यस्यां पुष्पोपचयममलं भूषणं सीधुहृद्यं,
गन्धद्रव्यं वसननिवहं सूक्ष्ममिच्छानुकूलम्
न्यस्तः प्रीत्या त्रिदशपतिना वासुदेवस्य वेश्म-
न्येकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥७९॥

हे नाथे ! यस्या-द्वारिकायामेक कल्पवृक्षः सकलमबलामण्डन सूते-जनयति । क ? वासुदेवस्य-विष्णोर्वेश्मनि । किं ? तत् पुष्पोपचयं अमल भूषण तथा गन्धद्रव्यं-सुरभिवस्तु । किम्भूतं ? सीधुहृद्यं सीधुवदासववन्मनोहर । तथा सूक्ष्म तनुतंरतन्तुनिर्मित इच्छानुकूलं वसननिवहं-वस्त्रसमूह । किम्भूतः कल्पवृक्ष ? त्रिदशपतिना-इन्द्रेण प्रीत्या-आनन्देन न्यस्त -संस्थापितः ॥ ७९ ॥

एणांकाश्मावनिषु शिशिरे कुंकुमार्द्रैः पदांकैः,
शीतोत्कंपाद्गतिविगलितैर्वालकैः केशपाशात् ।
भ्रष्टैः पीनस्तनपरिसराद्रोध्रमाल्यैश्च यस्यां,
नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥८०॥

हे नाथ ! यस्या—द्वारिकाया कामिनीना नैशो मार्गः सवितुः—सूर्य उदये सूच्यते । अनेकनिपतितवालकाद्यलङ्कारदर्शनेन कामुकनिकेतनगमनानि युक्तकामिनीजनसचरणसरणि. प्रातर्लोकैरनुमीयत इति भावः । कैः ? कैस्तदा शिशिरे एणाङ्काश्मावनिषु—चन्द्रकान्तमणिनिबद्धभूमिषु कुंकुमार्द्रैर्घुसृणलिप्तैः पदाङ्कैश्चरणचिन्हैः । तथा 'शीतोत्कम्पात्' शीतेन—उदग्राबल्येन य कम्प शरीरचलन तस्मात् । गतिविगलितैर्गतिरवस्थाविशेषस्तया विगलितैः—पतितैः कस्मात् ? केशपाशात् । कैर्वालकैर्हीरैश्च, पुनः पीनस्तनपरिसराद्भ्रष्टैः रोध्रमाल्यैरेवममीभिरेवचिन्हैः कामिनीना नैशो मार्गः सूच्यत इति ॥ ८

बाणस्याजौ हरविजयिनो वासुदेवस्य यस्यां,
प्राप्यासत्तिं चरति गतभीः पुष्पचापो निरस्त्रः
यस्माद्धेला कृतयुवमनोमोहनाप्तप्रकर्षै—
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥८१॥

हे नाथ ! यस्या-द्वारिकाया हरविजयिनः—शम्भु जेतुर्बाणस्य आजो-सम्रामे वासुदेवस्य आसत्ति—नैकट्य प्राप्य—लब्ध्वा पुष्पचापः—कामो यस्माद्धेतोर्निरस्त्रोऽस्त्ररहितश्चरति—विहरति । किंभूत मन ? 'गतभीः' गता भीर्भय यस्म त्स गतभयत्वे कामस्य हेतुः सर्ववैरिविजेत्राजिनिविष्टकेशवासन्नावस्थायित्व मिति । तस्मात्तस्य-कामस्य आरम्भः कृत्यविधिश्चतुरवनिताविभ्रमैश्चतुरा—विदग्धाश्च ता वनिताश्चतुरवनितास्तासा विभ्रमा—विलासास्तैरेव सिद्ध —निष्पन्न । किंभूतैस्तैर्हेलाकृतयुवमनोमोहनाप्तप्रकर्षैः हेलया कृत यद्युवमनोमोहन—तरुणचेतोरञ्जनं तेनाप्तः—प्रकर्ष आधिक्य यैस्ते तै ॥ ८१ ॥

यायास्तस्मादथ परिवृतस्त्वं प्रवेशाय तस्यां,
तत्प्राचीनं पुरि हरिमुखैर्गोपुरं यादवेन्द्रैः
यत्राशोकः कलयति नवस्तोरणाभां तथान्यो—
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥८२॥

हे नाथ ! अथेत्यनन्तर तस्मात्प्रदेशात्तस्या–द्वारिकाया पुरि प्रवेशाय-प्रवेशार्थं तत्प्राचीन, गमननिर्गमनानुभूत गोपुर-पूर्द्वार यायाः–गच्छेः । किंभूत सन ? हरिमुखै,–विष्णुप्रमुखैर्यादवेन्द्रै परिवृतः–आश्रित सन । तदिति किं ? यत्र यस्मिन्गोपुरे नव अशोकस्तोरणाभां वहिर्द्वारशोभा कलयति–वहति । तथा अन्योपि द्वितीयो 'हस्तप्राप्यस्तवकनमितः'–हस्ताभ्या प्राप्या ये स्तवका.–पुष्पसंघातास्तैर्विनतो–विनम्रीभूतो बालमन्दारवृक्षो–देवद्रुमस्तोरणाभा विभर्त्ति इति ॥ ८२ ॥

उद्यद्वालव्यजनमनिलोल्लासिकासप्रसूनाः,
श्वेतच्छत्रं विकसितसिताम्भोजभाजो विलोक्य
तस्यां पौरा विशदयशसं न श्रियः शारदीना,
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्यहंसाः ॥८३॥

हे नाथ ! तस्या-द्वारिकाया पौरा–नागरिकास्त्वां विलोक्य–दृष्ट्वा 'शारदीनाः–शरत्कालसम्बन्धिनीः श्रियो–लक्ष्मीरपि न ध्यास्यन्ति–न स्मरिष्यन्ति । किंभूता. पौरा ? 'व्यपगतशुचः' व्यपगता–त्वद्विरहसमुत्था शुक्–शोको येषा ते व्यपगतशुचः । अथोभयोः पृथक् २ विशेषणैः साम्य दर्शयति । किंभूतं त्वा ? 'उद्यद्वालव्यजन' उद्यन्ती–पार्श्वयोश्चलन्तीर्वालव्यजने–चामरे यस्य स त । किंभूताः श्रियः ? 'अनिलोल्लासिकासप्रसूनाः' अनिलेन–वायुना उल्लासीनि–नर्त्तनोद्यतानि कासप्रसूनानि–कासपुष्पाणि यासु ताः । किंभूतं त्वा ? 'श्वेतच्छत्र' श्वेतानि छत्राणि यस्य स तं । किंभूताः श्रियः ? 'विकसितसिताम्भोजभाज.' विकसितानि-प्रफुल्लानि यान्यम्भोजानि तानि भजन्ते यास्ता विकसितसिताम्भोजभाजः । किंभूतं त्वा ? 'विशदयशस' विशदं-निर्मल यशो यस्य स

त । किम्भूतास्ता. ? 'प्रेक्ष्यहसाः' प्रेक्ष्याः-प्रकर्षेण दर्शनीया हसा यासु ताः प्रेक्ष्य हसा , शरदि विशदजलाश्रयत्वाद्धंसागमन ॥ ८३ ॥

पुष्पाकीर्णं पुरि सह तदा यस्त्वया राजमार्गं,
यास्यत्युद्यद् ध्वजनिवसनं चन्दनांभश्छटाङ्कम् ।
शौरिं पीताम्बरधरमनु क्ष्माधरे मेघमेनं,
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥८४॥

हे नाथ ! पुरि—द्वारिकाया यः—पीताम्बरधर शौरिस्तदा पुरप्रवेशोत्सवे त्वया सह राजमार्गं यास्यति । त्वा भवन्तमनुलक्षीकृत्य तदनुगामित्वेनेत्यर्थः । तमेव पीताम्बरधर शौरिं—विष्णु अहं स्मरामीति—स्मरिष्यामि । "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति वचनाद्भविष्यति वर्त्तमानता । किंकृत्वा ? क्ष्माधरे—गिरौ 'उपान्तस्फुरिततडित' उपान्ते—पर्यन्ते स्फुरिता—उल्लसिता तडिद्यस्य स उपान्तस्फुरिततडितमेन मेघ प्रेक्ष्यावलोक्य । किम्भूतं राजमार्गं ? 'उद्यद्ध्वजनिवमन उद्यन्ति—उच्छलन्ति ध्वजाना निवमनानि वस्त्राणि यस्मिन्स पुनः किम्भूत ? 'चन्दनाम्भश्छटाकं' चन्दनाम्भसा याश्छटास्तासामङ्कश्चिह्नं ते यस्मिन्स त ॥ ८४ ॥

यान्तं तस्यां पुरि हरिबलावुत्सवैः कामिनौ त्वां,
हर्षोत्कर्षं नरपतिपथे नेष्यतस्तौ ययोस्तु ।
स्त्रीणामेको रमयति शतान्यङ्गनां पाययित्वा—
कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥८५॥

हे नाथ ! तस्या पुरि—द्वारिकाया यान्तं-गच्छन्त त्वा तौ उत्सवैस्त्वत्प्रवेशमहैः कामिनौ-हरिबलौ हर्षोत्कर्षं यथास्यात्तथा नरपतिपथे-राजमार्गे नेष्यत प्रापयिष्यतः । ताविति कौ ? ययोर्हरिबलयोर्मध्ये एको हरिः स्त्रीणा शतानि रमयति—विनोदयति । अन्यो बलदेवः काञ्चिदङ्गना पतिपाययित्वा मदिरामिति शेषः । अस्या वदनमदिराङ्गडूषमिव वाञ्छति-वाञ्छति । केन ? 'दोहदच्छद्मन

सौधश्रेणीर्विततविलसत्तोरणान्तर्व्यतीत्य,
स्वावासं तं मणिचयरुचा भासुरं प्राप्स्यसि
यस्मिन्कस्मै भवति न मुदे साग्रभूमिर्घनानां,
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥८६॥

हे नाथ ! त्वं सौधश्रेणीर्नृपमन्दिरराजीर्विततविलसत्तोरणान्तः वितता-विस्तीर्णानि विलसन्ति आदर्शादिभिर्विराजन्ति यानि-तोरणानि तेषाम-न्तर्मध्ये व्यतीत्यातिक्रम्य तं स्वावास-निजसौधं प्राप्स्यसि । किम्भूतं स्वावासं ? 'मणिचयरुचा' चन्द्रकान्तादिमणिसमूहकान्त्या भासुर-देदीप्यमानं । तमिति कं ? यस्मिन्स्वावासे सा-अग्रभूमिः कस्मै-पुरुषाय मुदे-हर्षाय न भवति । सेति-कां? यामग्रभूमिं दिवसविगमे-सन्ध्यासमये घनानां-मेघानां सुहृन्मित्रं वो-युष्माकं नीलकण्ठो-मयूरः अध्यास्ते-अधिवसति ॥ ८६ ॥

नत्वा पूर्वं पितृमुखगुरून् तान्विसृज्याथ बन्धून्
सौधं मां च द्वयमपि ततोऽलंकुरुष्वार्द्रचित्तः
यन्निःश्रीकं हरति न मनस्त्वां विना यादवेन्दो,
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥८७॥

हे यादवेन्दो ! त्वं पूर्वं तान्-'पितृमुखगुरून्' पितरौ मुखे आदौ येषां ते पितृमुखास्ते च ते गुरवश्च गरिष्ठास्तान् अन्यबन्धूनपरस्वजनान् नत्वा, विसृज्य स्वगृहगमनायादिश्य । ततः पश्चात् आर्द्रचित्तः-सकरुणः सन् सौधं-स्वावास-भवनं मां च द्वयमपि अलंकुरुष्व-विभूषय । यद्द्वयं त्वां विना निःश्रीकं-गतल-क्ष्मीकं सज्जनानां मनो न हरति-न चोरयति, अमुमेवार्थं द्रढयति । सूर्यापाये सूर्यस्यापायो विरहः च अस्तावाद्दुर्दिन उपरागो वा, तदभिभूते रवौ न खलु कमलं स्वां स्वकीयां यथावस्थितामभिख्यां श्रियं पुष्यति-पुष्णाति । तथैतद्द्वय-मपि । अर्थान्तरन्यास । अत्र पुष च पुष्टौ दैवादिको धातुर्ज्ञेयः । यथास्यं-निरढ्ये-"तृष्णा न पुष्णाति यशांसि पुष्यती" त्यादि ॥८७॥

इत्युक्तेस्या वचनविमुखं मुक्तिकान्तानुरक्तं,
दृष्ट्वा नेमिं किल जलधरः सन्निधौ भूधरस्थः
तत्कारुण्यादिव नवजलाश्रानुविद्धां स्म धत्ते,
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥८८॥

इति अमुना पूर्वोक्तप्रकारेण विज्ञप्तिवाक्ये उक्ते सति, सन्निधौ श्रीनेमेः समीपे भूधरस्थो जलधरः, किलेति सभावने। अस्या-राजीमत्या वचनविमुखं-चो नादरेण नेमिं दृष्ट्वा नवजलाश्रानुविद्धा-नवजलान्येवाश्राणि तैरनुविद्धा-योप्ता 'विद्युदुन्मेषदृष्टिं' विद्युत-उन्मेषः स्फुरणं-प्रकाशकत्वात् स एव दृष्टिस्ता स्तेस्म-अदधत-अरोदीदिवेत्यर्थः। उत्प्रेक्षते-'तत्कारुण्यादिव' तस्या-राजीमत्या उपरि यत्कारुण्य-करुणा तस्मादिव। किंभूत नेमिं ? 'मुक्तिकान्तानुरक्तं' मुक्तिकान्तायामनुरक्तोऽनुरागवान् यः स त। किंभूता विद्युदुन्मेषदृष्टिं ? 'खद्योतालीविलसितनिभा' खद्योताना-ज्योतिरिंगणाना या आली-श्रेणिस्तस्या यद्विलसित तन्निभा-तत्तुल्या ॥ ८८ ॥

तत्सख्यूचे तमथवचनं वाञ्छितं साधयास्या,
बालामेनां नय निजगृहं शैलशृङ्गं विहाय।
त्वत्संयोगान्ननु धृतिसमेतानवद्यांगयष्टि-
र्या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥ ८९ ॥

अथेत्यनन्तरं सखी तं-नेमिं तद्वचनं ऊचे। ब्रू धातोर्द्विकर्मकत्वात्कर्मद्वयं। तदिति किं ? हे नाथ! अस्या-राजीमत्या वाञ्छितमभिलषितं साधय। तथा शैलशृङ्ग-उज्जयन्ताद्रिशिखर विहाय एना-बाला अपरिणीतत्वात्-निजगृह नय-प्रापय। एनामिति का ? या तत्र स्वगृहे त्वत्सयोगात्-त्वन्मिलनान् ननु-निश्चित धृतिसमेता-सन्तोषवती स्यात्। किम्भूता ? 'अनवद्यांगयष्टिः' अनवद्या-निष्पापा अंगयष्टिर्यस्याः सा। उत्प्रेक्षते-युवतिविषये स्त्रीलक्षणपदार्थनिर्माणे धातुर्ब्रह्मण आद्या सृष्टिरिव। प्रथममेना मूलपातिं निर्माय ब्रह्मणा तदीय निर्माणसमुत्पन्न-प्रयासनिर्विण्णेन तत्प्रतिच्छन्दक एव निर्मितः समस्तोऽप्यपरनारीजन इति ॥८६॥

अस्वीकारात्सुभग भवतः क्लिष्टशोभां कियद्भि-
र्मुद्धीमन्तर्विरहशिखिना वासरैर्दह्यमानाम् ।
एनां शुष्यद्वदनकमलां दूरविध्वस्तपात्रां,
जातां मन्ये तुहिनमथितां पद्मिनीवान्यरूपाम् ॥९०॥

हे सुभग ! मुद्धीं एनां—बालां भवतस्तव अस्वीकारादनङ्गीकारात् क्लिष्टशोभा—म्लानच्छाया कियद्भिर्वासरैरन्तर्विरहशिखिना—अन्तश्चित्ते विरह एव शिखी-वह्निरन्तर्विरहशिखी, तेन दह्यमाना अन्यरूपा जाता मन्ये । परिम्लानदेहलावण्यतया परावर्त्तितरूपामिवानुपलक्षणीयामित्यर्थः । किम्भूतामेनां ? 'शुष्यद्वदनकमलां' शुष्यच्छोषं प्राप्नुवद्वदनकमलं यस्याः सा तां । पुनः किम्भूतां ? 'दूरविध्वस्तपात्रां' दूरेण विध्वस्तान्यपनीतानि पात्राणि नाट्यानुकर्त्तारो यथा सा तां । कामिव ? 'तुहिनमथितां' तुहिनं—हिमं तेन मथिता तां । वा इवार्थे । पद्मिनीमिव, पद्मिन्यपि शुष्यद्वदनकमला भवति । शुष्यद्वदने-मुखे कमलं यस्याः सा तथा । दूरविध्वस्तपात्रा, पत्राणां समूहः पात्रं, अथवा पर्णामिधानं पात्रं, दूरेण विध्वस्तं पात्रं यस्याः सा, ईदृग्विधा भवतीति । "पात्राणुकृत्तृशोर्मध्ये, पर्णे नृपति मन्त्रिणी"—इत्यनेकार्थोक्तेः ॥ ९० ॥

आकांक्षन्त्या मृदुकरपरिष्वंगसौख्यानि सख्याः,
पश्यामुष्या मुखमनुदितं म्लानमस्मेरमक्षि ।
उद्यत्तापात्कुमुदमिव ते कैरविण्या वियोगा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥ ९१ ॥

सखी स्वामिनं वक्ति—हे नाथ ! त्वं पश्य । यस्या अमुष्या राजीमत्या उद्यत्तापाद्दैन्यं लक्षणया विच्छायत्वं बिभर्त्ति—धारयति । किंकुर्वन्त्या यस्याः ? तव 'मृदुकरपरिष्वंगसौख्यानि' मृदू-सुकुमारौ यौ—करौ तयोर्यानि परिष्वंगसौख्यान्याश्लेषसुखानि तानि आकांक्षन्त्याः-वाञ्छन्त्याः । पुनः किम्भूतायास्त्वदनुसरणक्लिष्टकान्ते तव यत अनुसरणं पर्वतान्तर्निवासित्वेन तिरोधानं, तेन क्लिष्टाग्लपिता कान्तिर्यस्याः सा तस्या । किंभूतं मुखं ? अनुदितं-शोभया अप्रा-

मोदर्यं । पुनः कथम्भूतं ? म्लानं । पुनः किंभूतमस्मेरं-अविकस्वरं । पुनः कथम्भूतमस्रि-अस्राणि वियन्ते यस्मिंस्तत् । किमिव ? कैरविण्याः-कुमुद्वत्याः, कुमुदमिव । यथा-इन्दोर्वियोगात् कैरविण्याः-कुमुदं दैन्य-परिम्लानच्छायां बिभर्त्ति । अनुदितादीनि विशेषणानि कुमुदस्यापि योज्यानीति ॥ ९१ ॥

शय्योत्संगे निशि पितृगृहे प्राप्य निद्रां पुराऽसौ,
त्वं क ? स्वामिन् ! व्रजसि सहसेति ब्रुवाणा प्रबुद्धा ।
ऊचेऽस्माभिर्न खलु नयनेनापि येनेक्षितासीः,
कच्चिद्भर्तुः स्मरसि रसिके ! त्वं हि तस्य प्रियेति ॥ ९२ ॥

हे नाथ ! असौ-राजीमती पितृगृहे-जनकमन्दिरे पुरा निशि-रा शय्योत्संगे-तल्पोपरि निद्रां प्राप्य इति ब्रुवाणा-इति वदन्ती प्रबुद्धा-जजागार इतीति किं ? हे स्वामिन् ! सहसा अनुक्त्वैव क्व व्रजसि ? । तदानीमस्मा सखीभिरूचे-हे रसिके ! गुणानुरागिणि, यद्वा सुखदुःखास्वादवेदिनि । यदने कार्थः-"रस स्वादे जले वीर्ये, शृङ्गारादौ विषे द्रवे । बले रागे देह धातौ, पारदे" इत्यादि । कच्चिदिति-कोमलामन्त्रणे, येन-प्रियेण त्वं नयनेनापि न खलु ईक्षि तासीः । तस्य भर्तुः स्मृत्यर्थदयेशां कर्मणि षष्ठी । तं भर्तारं-स्वामिनं प्रिये स्मरसि ॥ ९२ ॥

एतद्दुःखापनयरसिके प्राक् सखीनां समाजे,
गायत्येषा किमपि मधुरं गीतमादाय वीणाम् ।
त्वद्ध्यानेनापहृतहृदया गातुकामा ललज्जे,
भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥ ९३ ॥

हे नाथ ! सखीनां समाजे-समूहे प्राक्-पूर्वं 'कितवमधुरं' कितवेन निर्देश भावप्रधानत्वात् कितवतया-धूर्ततया मधुरं-मृष्टं गीतं गायति सति, एषा-बाला वीणा मादाय गातुकामा ललज्जे । किंभूते सखीसमाजे ? 'एतद्दुःखापनयरसिके' एतस्य राजीमत्या यद्दुःखं विरहजा-व्यथा तस्यापनयः-स्फेटनं, तत्र रसिको-रागव

यः स तस्मिन् । किंभूता एषा ? त्वद्ध्यानेन-त्वत्स्मरणेन 'अपहृतहृदया' अपहृतं हृदय-चेतो यस्याः सा तथा । पुनः किंकुर्वती ? भूयोःभूयः-पुनः पुनः स्वयमपि कृता मूर्छना-स्वरसारणा "सप्तस्वरास्त्रयो ग्रामा, मूर्छनास्त्वेकविंशति । स्थानान्येकोनपचाशद्, एतद्गीतस्य लक्षणम् ॥" मनस शून्यत्वाद्विस्मरन्ती ॥६३॥

त्वत्प्राप्त्यर्थं विरचितवती तत्र सौभाग्यदेव्याः,
पूजामेषा सुरभिकुसुमैरेकचित्ता मुहूर्त्तम् ।
दैवज्ञान् वा नयति निपुणान् स्म क्षणं भाषयन्ती,
प्रायेणैते रमणविरहेष्वंगनानां विनोदाः ॥ ९४ ॥

हे नाथ ! तत्र द्वारिकाया एषा-बाला त्वत्प्राप्त्यर्थं मुहूर्तं यावत् सौभाग्यदेव्या सुरभिकुसुमै -सुगन्धिपुष्पैः पूजा एकचित्ता-एकाग्रमनाः सती विरचितवती-कृतवती । वात्र चार्थः, वा-पुनः निपुणान् त्रिकालवेदिनो दैवज्ञान-ज्योतिषिकान् भाषयन्ती-वादयन्ती । क्षणं-कालविशेषं नयतिस्म । हि-यस्माद्रमणविरहे प्रायेणाङ्गनानामेते विनोदादि न गमनिका केलयो भवन्ति ॥६४॥

याते पाणिग्रहणसमयेऽद्रिं विहाय त्वयी मां,
त्यक्त्वा माल्यं सपदि रचिता या त्वया प्राग्वियोगे
तामेवैषा वहति शिरसा स्वे निधाय प्रदेशे,
गल्लाभोगात् कठिनविषमामेकवेणीं करेण ।

हे नाथ ! पाणिग्रहणसमये-विवाहकाले त्वयि इमा-बालां विहाय अद्रिं रैवतकगिरिं प्रतियाते-गते सति सपदि शीघ्र माल्यं-माला त्यक्त्वा एकवेण तया बालया प्राक्-पूर्वं वियोगे-त्वद्विरहे रचिता तामेवैकवेणी एकैव वेणी न पुनर्विमुत्य विमुत्य-ग्रथिता, प्रथमदिवसग्रथितवेत्येकशब्दाभिप्राय । ता करेण स्वे प्रदेशे-निजे शिरोभागे निधाय-संस्थाप्य शिरसा वहति । किंभूतामेकवेणीं ? गल्लाभोगाद्गण्डाभोगात् कठिनविषमा-कठोरनिम्नोन्नताम् ॥ ६५ ॥

गीताद्यैर्वा श्रुतिसुखकरैः प्रस्तुतैर्वा विनोदैः,
पौराणीभिः कृशतनुमिमां त्वद्वियोगात्कथाभिः ।

तुष्टिं नेतुं रजनिषु पुनर्नालिवर्गः-क्षमोभूत् ,
तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ ९६ ॥

हे नाथ ! अलिवर्गः-सखीसमूहस्त्वद्वियोगात् कृशतनु-दुर्बलदेहा तामिमा बाला रजनिषु तुष्टिं-प्रीतिं नेतु पुनः क्षमः समर्थो नाभूत् । कैः ? कैरित्याह-गीताद्यैः । किंभूतैः ? श्रुतिसुखकरैः-श्रवणप्रीतिकारिभिस्तथा, द्वावपि व शब्दौ चार्थौं, वा-पुन. प्रस्तुतैः-प्रस्तावोचितैर्विनोदैः-विनोदवाक्यैः तथा । वा-पुनः पौराणीभिः-पुराणसम्बन्धिनीभिः कथाभिः । किम्भूता तामुन्निद्रा-विरहजागरा । किम्भूतोऽलिवर्गः ? 'अवनिशयनासन्नवातायनस्थ' अवनौ-पृथिव्या शयनं अवनिशयनं, तत्र आसन्नो-निकटवर्ती योसौ वातायनो-गवाक्षस्तत्र तिष्ठतीति अवनिशयनासन्नवातायनस्थः ॥ ९६ ॥

या प्रागस्याः क्षणमिव नवैर्गीतवार्त्ताविनोदै—
रासीत् शय्यातलविगलितैर्गल्लभागो विलंघ्य ।
रात्रिं संवत्सरशतसमां त्वत्कृते तप्तगात्री,
तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्ती ॥ ९७

हे नाथ ! अस्या—बालायाः प्राक् बाल्यावस्थाया नवैर्गीतवार्त्ताविनोद-गीतानि च गायनोद्गातानि वार्त्ताश्च पुरा भवा विनोदाश्च तैर्या रात्रिः क्षणमिवासीत् । तामेव रात्रिं सवत्सरशतमिता—वर्षशतमिता त्वत्कृते—त्वदर्थं तप्तगात्री विरहसन्तप्तदेहा राजीमती विरहजनितैर्वियोगोत्पादितैरुष्णैरश्रुभिर्यापयन्ती-अतिवाहयन्ती वर्त्तते । किम्भूतैरश्रुभिर्गल्लभागो विलघ्यातिक्रम्य 'शय्यातलविगलितैः' शय्यातले विगलितानि-पतितानि तैः शय्यातलविगलितैः ॥ ९७ ॥

पश्यन्ती त्वन्मयमिव जगन्मोहभावात्समग्रं,
ध्यायन्ती त्वां मनसि निहितं तत्क्षणं तद्विरामे ।
मूर्त्तिं भित्तावपि च लिखितामीक्षितुं ते पुरस्ता—
दाकांक्षन्ती नयनसलिलोत्पीडरुद्धावकाशाम ॥ ९

हे नाथ ! इयं बाला मोहभावात् समग्रं जगत् त्वन्मयमिवं त्वद्रूपमिव । तद्रूपे मयट् । पश्यन्ती–वर्त्तते । तथा तत्क्षण तद्विरामे–मोहविरागे मनसि निहित–स्थापित, त्वा–नाथ ध्यायन्ती-वर्त्तते । तथा च पुनस्ते–तव भित्तावपि लिखिता चित्रिता मूर्त्ति–प्रतिबिम्बं 'नयनसलिलोत्पीडरुद्धावकाशा' नयनसलिलस्य–शोकजलस्य यः उत्पीडः-पूरस्तेन रुद्धः अवकाशो यस्याः सा तथा । तामीक्षितुं आकाङ्क्षन्ती–वाञ्छन्ती वर्त्तत इति, क्रियाध्याहारः सर्वत्रकार्य इति ॥ ॥ ६८ ॥

अन्तर्भिन्ना मनसिजशरैर्मीलिताक्षी मुहूर्त्तं,
लब्ध्वा संज्ञामियमथ दृशाऽवीक्षमाणार्त्तिदीना ।
शय्योत्संगे नवकिशलयस्रस्तरे शर्म लेभे,
साभ्रेह्नीव स्थलकमलिनी न प्रबुद्धा न सुप्ता ॥ ९९ ॥

हे नाथ ! इयं बाला शय्योत्सगे–शयनोपरितले न प्रबुद्धा न सुप्ता शर्म लेभे । अथतत्कारणगर्भितानि विशेषणान्याह–किम्भूतेय ? मनसिजशरैः–कामबाणै अन्तर्भिन्ना–चेतसि विदारिता सती मुहूर्त्तं यावत् मीलिताक्षी-मीलिते अक्षिणी यया सा मीलिताक्षी । अथ मुहूर्त्तं यावत् संज्ञां–चेतनां लब्ध्वा–प्राप्य दृशा अवीक्षमाणा–अपश्यन्ती भवन्तमिति शेषः । पुनः किम्भूता ? 'आर्त्ति–दीना' आर्त्तिर्विरहजा पीडा तया दीना आर्त्तिदीना । किम्भूते शय्योत्सगे ? 'नवकिशलयस्रस्तरे' नवकिशलयाना–नवपत्राणा स्रस्तरः-सस्तरो विद्यते यस्मिन्स तस्मिन । केव ? स्थलकमलिनीव । यथा स्थलकमलिनी साभ्रेह्नि दुर्दिननिघकारिते दिवसे न प्रबुद्धा न सुप्ता, सुख विकाशत्व लभते । अयमर्थः-विगीलितलोचनत्वान्न प्रबुद्धा । मुहूर्त्तं यावत्सज्ञाप्राप्तेश्च न सुप्तेति ॥ ६६ ॥

वृत्तान्तेस्मिन् तदनु कथिते मातुरस्यास्तयैत–
द्वृत्तं ज्ञातुं निशि सह मया प्रेपितः सौविदल्लः ।
सख्या पश्यन्नयमपि दशां तां तदोचे च जातं,
प्रत्यक्षन्ते निखिलमचिराद् भ्रातरुक्तं मया यत् ॥१००॥

पुनः सखी ब्रूते—हे नाथ ! अस्या राजीमत्या मातु -श्रीशिवाया [? श्रीधारिण्या] पुरः अस्मिन्वृत्तान्ते राजीमत्यनंगीकाररूपे कथिते सति तदनुपश्चादेतद्वृत्तं-चरित्रं ज्ञातु निशि-रात्रौ तया मात्रा मया सख्या सह सौविदल्लः-कञ्चूकी प्रेषितः । अयमपि सौविदल्लोपि ता—दशा राजीमत्या अनादररूपामवस्था पश्यन् । च-पुनर्मया सख्या तदा ऊचे—उक्तम् । यत् हे भ्रातर्यन्मया उक्त तन्निखिलमपि अचिरात्—तव प्रत्यक्ष जात । तदीय-तथाविध चेष्टादर्शनान् मद्वाक्यस्यानृतत्वं जातमित्यर्थः ॥ १०० ॥

प्रेक्ष्यैतस्मिन्नपि मृगदृशस्तामसह्यामवस्था—
प्रत्या याते कथयति पुरो विस्तरादेतदेव ।
दृग्भ्यां दुःखाद्दुहितुरसृजद्वाष्पमच्छिन्नधारं,
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥१०१॥

एतस्मिन्नपि सौविदल्लोपि मृगदृशो-राजीमत्यास्तामसह्यामसहनीयामवस्थां प्रेक्ष्य । प्रत्यायाते-प्रतिनिवृत्ते शिवायाः [? धारिण्या] पुरो विस्तरादेतदेव कथयति सति दुहितृ राजीमत्या दु.खात् शिवा [? धारिणी] दृग्भ्या वाष्प-रोदन असृजत् अकरोत् । कथ ? यथा भवति । अच्छिन्नधारं-अत्रुटितप्रवाह यथास्यादिति । अर्थान्तरन्यासमाह-प्रायो वाहुल्येन सर्वः कोपि आर्द्रान्तरात्मा—सरसचित्तः सन् करुणावृत्ति —कृपाव्यापारः परदुःखाद्भवति । इयमपि माता—स्वदुहितृ दुःखदु खितास्ति । स्नेहजलपूर्णमभ्यन्त्वादित्यर्थ ॥१०१॥

आहूयैनामवददथ सा निर्दयो योऽत्यजत्त्वा—
मित्थं मुग्धे ! कथय किमियद्धार्यते तस्य दुःखम् ।
त्यक्त्वा लोलं नयनयुगलं तेरुणत्वं रुदत्या—
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ १०२ ॥

अथेत्यनन्तरं सा—माता एना—राजीमतीमाहूय—आकार्य अवदत् । हे मुग्धे ! यो निर्दयो-निःकरुण इत्थं बहुविज्ञप्तिवाक्यैः प्रसादितोपि त्वा अत्यजत् तस्य—नेमेरियदेतावन्मानं दु ख किं धार्य्यते—किमुह्यते । तथा रुदत्यास्ते—ता

लोलतरलं-नयनयुगल अरुणत्वं त्यक्त्वा 'चलकुवलयश्रीतुला एष्यति' चलानि-चचलानि यानि कुवलयानि तेषां या श्री –शोभा तस्यास्तुला-साम्यं प्राप्स्यति। कुवलयचलने कारणमाह–कस्मान्मीनक्षोभात्-मत्स्यचलनात् ॥१०२।

अन्तस्तापात् मृदुभुजयुगं ते मृणालस्य दैन्यं,
म्लानं चैतत् मिहिरकिरणक्लिष्टशोभस्य धत्ते
प्लुष्टः श्वासैर्विरहशिखिना सद्वितीयस्तवायं,
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥१०३॥

हे राजीमति ! च–पुनरेतत् तव मृदु–सुकुमार भुजयुगं अन्तस्तापाश्चे-मे विरहदाहात् म्लानं सत् मृणालस्य–कमलनालस्य दैन्यं–परिम्लिष्टच्छायत्वं ते–बिभर्त्ति । किम्भूतस्य मृणालस्य ? 'मिहिरकिरणक्लिष्टशोभस्य' मिहि-रकिरणैः-सूर्यकरैः क्लिष्टाग्लपिता–शोभा यस्य स तत्तस्य तथा । हे राजीमति ! तव अय 'सरसकदलीस्तम्भगौरः' सरसा–आर्द्राश्च ताः कदल्यश्च सरसकदल्य-स्तासां य स्तम्भस्तद्वद्गौरः, ऊरुश्चलत्व यास्यति-निर्मांसत्व प्राप्स्यति । किम्भूत ऊरुः ? स्वासैः–विरहोष्णोच्छ्वासैः, प्लुष्टो–दग्ध । पुनः कथंभूतो ? विरहशिखिना–विरहाग्निना सद्वितीयः–सह द्वितीयेन वर्त्तत इति सद्वितीयः ॥१०३॥

वत्से ! शोकं त्यज भज पुनः स्वच्छतामिष्टदेवाः,
कुर्वन्त्येवं प्रयत मनसोऽनुग्रहं ते तथामी ।
भर्तुर्भूयो न भवति रहः संगतायास्तथा ते,
सद्यः कण्ठच्युतभुजलता ग्रन्थिगाढोपगूढम् ॥१०४॥

हे वत्से ! राजीमति ! शोकं त्यज–जहीहि । पुन स्वच्छता चेत. प्रस-न्नता भज । एव अमी इष्टदेवा–अभीष्टदेवता प्रयतमनस -उद्युक्तचेतसः सन्तः, तथा अनुग्रह–प्रसाद कुर्वन्तु । यथा ते-तव भूयो भर्तु. रहः संगताया-एकान्ते मेलिताया गाढोपगूढ–निविडालिंगितं सद्यस्तत्कालं 'कण्ठच्युतभुजलताग्रन्थि न भवति' कण्ठाच्च्युतो–भ्रष्टो भुजलता या ग्रन्थिर्यस्मिन्तत् कण्ठच्युतभुजलता-ग्रन्थि, एवविध न भवति ॥ १०४ ॥

आरोप्यांके मधुरवचसाऽऽश्वासितेत्थं जनन्या,
तत्याजाधिं क्षणमपि न या त्वद्वियोगात्कृशांगी ।
संप्रत्येषा विसृजति यथा सूनृतैस्तां तथाजौ,
वक्तुं धीर स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥१०५॥

या बाला जनन्या–शिवया अंके–उत्संगे आरोप्य–संस्थाप्य मधुरवचसा इत्थं पूर्वोक्तप्रकारेण आश्वासिता सती आधिं-मानसीं व्यथा क्षणमपि न तत्याज । किम्भूता ? त्वद्वियोगात्–त्वद्विरहात् कृशांगी-दुर्बलदेहा एषा–राजीमती संप्रति, यथा सूनृतैः–सत्यैः 'स्तनितवचनैः' स्तनितवद्-गर्जितवद्गम्भीराणि यानि वचनानि तैः स्तनितवचनैस्तं आधिं विसृजति–त्यजति । तथा हे आजौ–रणे धीर ! तां मानिनीं-स्वभावादहंकारिणीं प्रति वक्तुं प्रक्रमेथाः–उपक्रमं कुर्याः ॥१०५॥

मातुः शिक्षाशतमलमवज्ञाय दुःखं सखीना-
मन्तश्चित्तेष्वजनयदियं पाणिपंकेरुहाणि ।
हस्ताभ्यां प्राक् सपदि रुदती रुन्धती कोमलाभ्यां,
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥१०६॥

इयं राजीमती मातुः-श्रीशिवाया [? श्रीधारिण्याः] शिक्षाशतमलमत्यर्थमवज्ञाय–अवधीरयित्वा सखीनामन्तश्चित्तेषु दुःखं अजनयत्–उदपादयत् किंकुर्वती इय ? अनुक्तोपि च शब्दोत्र योज्यते । च-पुनः सखीनां पाणिपंकेरुहाणि कोमलाभ्यां हस्ताभ्यां प्राक् रुन्धती–प्रतिषेधयन्ती । किंभूतानि सखीनां पाणिपंकेरुहाणि ? "अबलावेणिमोक्षोत्सुकानि" अबलायाः–राजीमत्या यो वेणिमोक्षो–वेणिछोटनं तत्रोत्सुकानि–उत्कण्ठितानि । पुनः किंकुर्वती ? सपदि शीघ्रं मन्द्रस्निग्धैर्गम्भीरमधुरैर्ध्वनिभिः शब्दैः रुदती–अश्रूणि मुञ्चन्ती ॥ १०६ ॥

वृद्धः साध्व्याः सुभग ! तव यः प्रेषितोभूत् प्रवृत्तिं,
ज्ञातुं तस्मात्कुशलिनमियं रैवताद्रौ द्विजातेः ।
त्वामाकर्ण्योच्छ्वसितहृदयासीत्क्षणं सुन्दरीणां,

कान्तोदन्तः सुहृदुपगतः संगमात् किञ्चिदूनः ॥१०७॥

हे सुभग !—श्रीनेमे ! साध्व्या—शोभनशीलया राजीमत्या तव प्रवृत्ति ज्ञातु यो वृद्धो द्विजानि प्रेषितोऽभूत् । तस्मात् द्विजातेरिय बाला त्वा रैवताद्रौ कुशलिन—कल्याणवन्तमाकर्ण्य-श्रुत्वा क्षण यावदुच्छ्वसितहृदया—हर्षेणोल्लसित-मानसा आसीन—बभूव । यतः सुन्दरीणा सुहृदुपगतो—मित्रेणानीतः । अनेन च सदेशाव्यभिचारित्वं सूच्यते । कान्तोदन्त —प्रियतमसन्देशः सगमात प्रिय-सयोगात् किञ्चिन्मनागेव ऊनो-न्यून इति ॥ १०७ ॥

इत्थं कृच्छ्रे विधुरवपुषो वासरान् वर्पतुल्यां-

स्तस्याः सख्या जनकसदने त्वद्वियोगान्नयन्त्याः ।

अन्तश्चित्ते तव सुखलवो न प्रपेदे प्रवेशं,

संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥१०८॥

हे नाथ ! इत्थं अमुना प्रकारेण कृच्छ्रे—कष्टे विधुरवपुषः-पीडितदेहाया-स्तस्या सख्या—राजीमत्या जनकसदने- पितृगृहे त्वद्वियोगात—त्वद्विरहात वास-रान—दिनानि वर्पतुल्यान् नयन्त्या —प्रापयन्त्या, अन्तश्चित्ते तव-नाथस्य सुखलव शरीरेणेति गम्यते, प्रवेश न प्रपेदे—न प्राप्तवान । सकल्पैर्मनोवाञ्छाभिस्तैरिति पूर्वदर्शनादिव्यापारैस्तव सुखलव प्रविशति । यतो वैरिणा विधिना-दैवेन रुद्ध-मार्ग समुखलव इति ॥ १०८ ॥

प्राप्यानुज्ञामथ पितुरियं त्वां सहास्माभिरस्मिन्,

संप्रत्यद्रौ शरणमबला प्राणनाथं प्रपन्ना ।

अर्हस्येनां विषमविशिखाद्रक्षितुं त्वं हि कृच्छ्रे,

पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ १०९ ॥

अथेत्यनन्तर इय-राजीमती अबला पितु —समुद्रविजयस्य (? उग्रसेनस्य) अनुज्ञामादेश प्राप्य, अस्माभिः सखीगोविदलादिभि. सह अस्मिन्नद्रौ-उज्जयन्ता निधि त्वा प्राणनाथ शरणा प्रपन्ना । अतो हि-निश्चित, त्व एना-बाला कृच्छ्रे-कष्टे

विषमविशिषात्कामाद्रक्षितुमर्हसि योग्यो भवसि । यतः सुलभविपदा-क्षणविनश्वरत्वाच्छरीरस्य प्राणिनामेतदेव कुशलपृच्छनमेव पूर्वाभाष्य-प्रथममालपनीय-प्रथमप्रष्टव्यमित्यर्थः । अर्थान्तरन्यास. ।। १०६ ।।

धर्मज्ञस्त्वं यदि सहचरीमेकचित्तां च रक्तां

किं मामेवं विरहशिखिनोपेक्ष्यसे दह्यमानाम् ।

तत्स्वीकारात्कुरु मयि कृपां यादवाधीश ! बाला,

त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ११० ॥

हे यादवाधीश ! श्रीनेमे ! बाला—राजीमती 'मन्मुखेन' मम सख्या मुखं मन्मुखं तेन, इद वक्ष्यमाणमाह—कीदृश ? तत् 'उत्कण्ठाविरचितपद' उत्कण्ठया-औत्सुक्येन विरचितानि पदानि शब्दा यत्र तत्तथा । यद्वा क्रियाविशेषणमेतदिति । इदमिति किं ?, हे नाथ ! यदि त्व 'धर्मज्ञो' जीवदयालक्षणधर्मज्ञाता वर्तसे तदा मा सहचरीं—सहचारिणीं च-पुनरेकचित्ता एकस्मिन्नेव भवलक्षणे प्रिये चित्त—मनो यस्या सा एकचित्ता ता, तथा रक्ता—अनुरागवती, एव विरहशिखिना—वियोगाग्निना दह्यमाना किमुपेक्षसे—किमुपेक्षा कुरुषे । तत्तस्माद्धेतोः स्वीकारात् मदीयेयमित्यङ्गीकारात् मयि कृपा दया कुरु । इतीद मन्मुखेनाह ॥ ११० ॥

दुर्लङ्घ्यत्वं शिखरिणि पयोधौ च गाम्भीर्यमुर्व्यां,

स्थैर्यं तेजः शिखिनि मदने रूपसौन्दर्यलक्ष्मीम् ।

बुद्धे क्षान्ति नृवर ! कलयामीति वृन्दं गुणानां,

हन्तैकस्थं क्वचिदपि न ते भीरुसादृश्यमस्ति ॥ १११ ॥

हे नृवर ! ते-तव-इति वक्ष्यमाण, दुर्लङ्घ्यत्वगाम्भीर्यादीना गुणाना वृन्द भवत्येव सर्वगुणानामविरोधतया अवलोकनात्, हन्त-इति खेदे, अन्यत्र तत्प्रतिकृतिदिदृक्षाकौतुकमपि न पूर्यत इति खेदः । क्वचिदपि त्रिभुवनेपि एकस्थ-एकस्मिन् वस्तुनि स्थित नास्ति । यत्र मम नयनप्रलोभन स्यात् । किन्तु क्वचित् पूर्वोक्तप्रकारेण व्यस्तमेव दृश्यते । तदेव दर्शयति—शिखरिणि पर्वते दुर्लङ्घ्यत्वं

च-पुन पयोधौ गाम्भीर्य-गम्भीरता, उर्व्या-पृथिव्या स्थैर्य-स्थिरता । शिखिनि-वह्नौ तेजः । मदने रूपसौन्दर्यलक्ष्मीं । बुद्धे-सुगते क्षान्ति-क्षमा कलयामीति क्रियासर्वत्र योज्यते । एवं व्यस्तमेव गुणवृन्दमस्ति नत्वेकस्थं । उत्प्रेक्षते-गुणवृन्द भीरु इव अन्यदपि यत् किल भीरुवृन्दं भवति, तदपि न क्वचिदेकत्र प्राप्यत इति । अत्र लुप्तोपमा । किंभूत गुणवृन्द ? 'सादृश्य' सया-लक्ष्म्या दृश्य-दर्शनीयम् ॥ १११ ॥

एतानीत्थं विधुरमनसोऽस्वीकृतायास्त्वया मे,
दुःखार्त्तायाः क्षितिभृति दिनानीश ! कल्पोपमानि ।
आसन्नस्मिन्मदनदहनोद्दीपनानि प्रकामं,
दिक्संसक्तप्रविरसघनव्यस्तसूर्यातपानि ॥११२॥

